Library IIAS, Shimla
PH 320.109 34 K 167 H
00024280

# ARTHAŚĀSTRA-VYĀKHYĀ JAYAMAṄGALĀ

# अर्थशास्त्रव्याख्या - जयमङ्गला

*EDITED WITH INTRODUCTION*

BY

G. HARIHARA SASTRI



KUPPUSWAMI SASTRI RESEARCH INSTITUTE
MYLAPORE, MADRAS
1958

**Price: Rupees Three**

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

# ARTHAŚĀSTRA-VYĀKHYĀ
# JAYAMAṄGALĀ

## अर्थशास्त्रव्याख्या - जयमङ्गला

*EDITED WITH INTRODUCTION*

BY

G. HARIHARA SASTRI



PH
320.109 34
K 167 H

KUPPUSWAMI SASTRI RESEARCH INSTITUTE
MYLAPORE, MADRAS
1958

**Price: Rupees Three**

DATA ENTERED

CATALOGUED

Library IIAS, Shimla
PH 320.109 34 K 167 H
00024280
INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 24280
Date 19.4.68
SIMLA
PH
320.10934
K167 H

# INTRODUCTION

*Jayamaṅgalā,* the work edited here, is an important commentary on the *Arthaśāstra* of Kauṭalya. The commentator says at the outset that even as Kauṭalya composed the *Arthaśāstra* summarising the views of his predecessors, he has written his commentary embodying in it all that was found good in other commentaries on the work[1]. This shows that at the time of the commentator the *Arthaśāstra* was widely read and had several commentaries written on it. However during the centuries that followed, studies on the *Arthaśāstra* gradually declined, so much so that commentators like Mallinātha had to explain the *Artha* topics in Kāvyas without direct reference to their source, and what is left at the present time is only a few manuscripts of the text and broken fragments of some commentaries, in a corner of India, *viz.*, Kerala. The text of Kauṭalya is generally terse and not easily understood. Therefore the traditional commentaries, however fragmentary they be, are of great value for a correct interpretation of the text. Among the commentaries so far discovered *Pratipadapañcikā* of Bhaṭṭasvāmin (available for II. 8-36), *Nayacandrikā* of Mādhava Yajvan (available for VII. 7-11 and VII. 15—XII. 4) and a Tamil-Malayalam commentary (available for I-VII) were made use of by Dr. T. Ganapati Sastri for his edition of the *Arthaśāstra* which he published with his own Sanskrit commentary in the *Trivandrum Sanskrit Series* (Nos. 79, 80, 82). Later a fragment of another commentary containing the first two Adhikaraṇas and the first Adhyāya of the third Adhikaraṇa was secured by the Government Oriental Manuscripts Library, Madras, from the Paliyam family, Cochin, Kerala State. A paper transcript in Devanagari was made of this manuscript for the library (R. 5208) and the original was returned to the owner. Dr. Ganapati Sastri had another transcript made for himself but it reached him too late for use in his edition of the *Arthaśāstra*.

---

1. पूर्वमतानि यथेदं संगृह्यैकं चकार कौटल्यः ।
टीकान्तराणि दृष्ट्वा सद्व्याख्यानं समुद्धृत्य ॥
क्रियते तथा मयापि त्यक्त्वा च ग्रन्थविस्तरं पूर्णा ।
बालहिता टीकेयम् । (p. 1)

On fuller examination this manuscript appeared to contain fragments of two different commentaries. The text covering the first Adhikaraṇa (Book I) is called *Jayamaṅgalā*[1] (hereafter referred to as *Jaya*) and the remaining portion, *Cāṇakyaṭīkā*. The name of the author of the *Jaya* is not known, while the *Cāṇakyaṭīkā* is mentioned as the work of Bhikṣuprabhamati[2] and from the corrupt state of the manuscript it is not possible to ascertain whether it is a continuation of the *Jaya*. I have not so far been able to trace in literature any reference to the *Jaya* fragment, but the *Cāṇakyaṭīkā* is found quoted by name in the *Ṭīkāsarvasva*, commentary on the *Amarakośa* by Sarvānanda (1159 A.D.), and the quotations could be verified in the manuscript.[3] There are several gaps, errors and corrupt passages in the manuscript and they are tolerably less in the *Jaya* fragment than in the other. From the style and language the commentary seems to be ancient. It throws light on several unexplained words and passages in Kauṭalīya and often provides valuable variant readings. I therefore thought of bringing out an edition of it even though it was fragmentary. The only original manuscript which would have been of use to me in deciphering the corrupt passages was known to have been sent to Europe by the owner.[4]

---

1. This is evident from the colophon of the first Adhikaraṇa: 'समाप्तं चेदं कौटलीयार्थशास्त्रसद्व्याख्यानटीकायां जयमङ्गलायां विनयाधिकारिकं प्रथममधिकरणम्' ।(p. 76)

2. The ending colophon of the third Adhyāya runs thus: 'इति भिक्षुप्रभमतिकृतायां चाणक्यटीकायाम् आध्यक्ष्ये दुर्गविधानं तृतीयं प्रकरणम् । तृतीयश्चाध्यायः' ।(p. 107, Ms. with the editor).

3. (i) Cf. 'द्वीपिव्याघ्रयोरल्पमहत्तया भेदः' । (*Cāṇakyaṭīkā* on Kupyādhyakṣa, II. 17, p. 185 of Ms. with the editor) and 'द्वीपिव्याघ्रयोरल्पमहत्तया भेदः' इति चाणक्यटीकाकृतोक्तम् । (*Ṭīkāsarvasva*, II. 5.1, *TSS* 43, p. 214).

(ii) Cf. 'कुप्यमसारं द्रव्यम्' । (Ibid. Ms. p. 183) and 'कुप्याध्यक्षप्रचारे लोहवर्गश्चर्मवर्गो विषादिवर्गश्च दर्शितः, 'कुप्यमसारं द्रव्य'मिति तट्टीकाकृतश्च,' (Ibid. II. 9.22, *TSS* No. 51. p. 231)

(iii) रोहितो वातहरिणः, अश्वमृग इत्यन्ये, एणः स्वल्पमृगः, (Ibid. on Koṣṭhāgārādhyakṣa, II. 15, Ms. p. 179) and एणः स्वल्पमृगः सुनयनः । .........रोहितो घोटकरूपोऽश्वमृगः । तथा च 'रोहितोऽश्वमृग' इति कोष्ठाध्यक्षप्रचारटीका । (Ibid. II. 5. 10, *TSS* No. 43, p. 224.)

4. See M. Winternitz, "Zwei nue *Arthaśāstra* manuscripte" and IHQ. IV. 397: 'Mr. Anujan Achan of Santiniketan discovered two

The text edited is based on a single transcript in my possesion, copied by me from the paper transcript of Dr. Ganapati Sastri. The commentary is precise and clear; it discusses the correctness and propriety of terms according to Pāṇini's rules,[1] narrates stories to explain legendary allusions and criticises other commentators when it differs from them.[2] It may be noted here that some of the stories relating to the kings who are said to have lost their lives and kingdoms as a result of unrestrained passion are not traceable in the extent redactions of the Purāṇas and Itihāsas (*cf.* pp. 18-21). The commentary quotes from the *Mahābhārata*, *Kāmaśāstra* of Vātsyāyana (p. 6), *Tantrākhyāyikā* (p. 16) and other ancient works and mentions *Ṣaṣṭitantra*, the work of Sāṅkhya[3] (p. 10).

Commentaries called *Jayamaṅgalā* are known for the *Nītisāra* of Kāmandaka, *Kāmaśāstra* of Vātsyāyana, *Bhaṭṭikāvya* and *Sāṅkhyakārikā*. The present commentary *Jayamaṅgalā* on the *Arthaśāstra* adds one more to the list. The identity of the name of the work would suggest identity of authorship. It may also be noted here that the invocatory stanzas of these commentaries resemble one another,

---

manuscripts of the *Arthaśāstra* in his uncle's library in Cochin (Nos. 916 and 647) and sent them to Prof. Winternitz. Manuscript No. 916 contains a full commentary on the first two Adhikaraṇas and the first Adhyāya of the third Adhikaraṇa of the Kauṭalīya *Arthaśāstra*. The manuscript is written in Malayalam script and is incorrect and hardly legible. Neither the name of the commentary nor that of the commentator is to be found in the colophons; on the last page however, there are a few unconnected lines belonging to the commentary on the last portion of VII. 6 and the initial words of the *Nayacandrikā*.' This description tallies with the manuscript in my possession and also the paper transcript (R. 5208) in the Govt. Oriental Manuscripts Library, Madras.

1. See for instance, दुर्गलाभोपायः । लम्भ इत्यपप्रयोगः, "उपसर्गात् खल्घञोः" इति नियमात् । (p. 7). It may be noted that all printed texts read here दुर्गलम्भोपायः ।

2. केचित् कृषिपाशुपाल्ये इति समस्य पठन्ति । तत्र च प्रयोजनम् इतरेतरापेक्षत्वम् । वणिज्यायाश्च पृथक्करणं निरपेक्षत्वाद् इत्याहुः । तदयुक्तम् । सर्वेषां परस्परार्थकरणस्य अप्रतिषिद्धत्वात् । (p. 13).

3. See also *JOR*. III. 107-11.

and all of them pay obeisance to the same Omniscient One denoted by the word *Sarvavid*, *Sakalavedin*, or *Lokottara-vā(ve)din.*[1]

Kāmandaka in his *Nītisāra* (Ed. *TSS* 14) as stated in his introduction, summarises the *Arthaśāstra* of Kauṭalya; and in doing so, he leaves out Books II, III, IV and XV of the original. From this, it follows that the topics commented on in the first Adhikaraṇa of the *Jaya* on the *Arthaśāstra* are also found in the *Jaya* on *Kāmandaka*, consistent with the scope of its abridgement. On examination, it is seen that not only the topics, but words, ideas, explanations and illustrations are also identical in them. A few passages are shown below side by side for verification:

*Jaya on the Arthaśāstra*

चतस्र इति— यथोपवर्णितपूर्वाचार्यमतसंभवेऽपि परस्परं विसदृशव्यापारत्वाद् विसदृशरूपत्वाद् विसदृशफलत्वात् चतस्र एव । (p. 9)

*Jaya on Kāmandaka*

यथोपवर्णितपूर्वाचार्यमतसंभवेऽपि परस्परं विसदृशफलसिद्ध्यर्थं चतसृष्वेव लोको व्यवस्थितः । (p. 27)

---

1. पूर्वमतानि यथेदं संगृह्यैकं चकार कौटल्यः ।
टीकान्तराणि दृष्ट्वा सद्व्याख्यानं समुद्धृत्य ॥
क्रियते तथा मयापि त्यक्त्वा च ग्रन्थविस्तरं पूर्णां ।
बालहिता टीकेयं दुर्ज्ञेयं यद् वितत्य सर्वमिदम्? (प्रणम्य सर्वविदम्)॥
(p.1)

कामन्दकीये किल नीतिशास्त्रे प्रायेण नास्मिन् सुगमाः पदार्थाः ।
तस्माद् विधास्ये जयमङ्गलाख्यां तत्पञ्जिकां सर्वविदं प्रणम्य ॥
(*Jaya* on *Kāmandakīya*)

वात्स्यायनीयं किल कामशास्त्रं प्रस्तावितं कैश्चिदिहान्यथैव ।
तस्मात् विधास्ये जयमङ्गलाख्यां टीकामहं सर्वविदं प्रणम्य ॥
(*Jaya* on *Kāmaśāstra*)

प्रणिपत्य सकलवेदिनमतिदुस्तरभर्तृकाव्यसलिलनिधेः ।
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥
(*Jāya* on *Bhaṭṭikāvya*)

अधिगततत्त्वालोकं लोकोत्तरवा(वे)दिनं प्रणम्य मुनिम् ।
क्रियते सप्ततिकायाष्टीका जयमङ्गला नाम ॥
(*Jaya* on *Sāṅkhyakārikā*)

तद् यथा— अतिदानेन धर्मोऽर्थं पीडयित्वा धर्मान्तरं कामञ्च पीडयति । तपश्च अत्यन्तं सेवितं कामं पीडयित्वा शरीरक्षयाद् धर्मार्थौ बाधते । अर्थोऽपि तादात्विकोऽस्ति य उपादीयमानः ऐलस्येव धर्मकामौ बाधित्वा अर्थमपि बाधते । कामोऽत्यासेव्यमानः, शरीरक्षयादात्मानं पीडयति । (p. 23)

स्वाध्यायः । यस्मिन्नेव वेदे व्रतं चरति स एवाध्येय इति स्वग्रहणम् । ......एतद् वेदब्रह्मचारिण उपकुर्वाणस्य आ समावर्तनात् । आ मरणान्तात्तु नैष्ठिकस्य । अयं विशेषः— आचार्यकुले प्राणान्तिकी प्राणा एवान्तोऽवधिर्यस्या विद्यते सा । (p. 11)

शुश्रूषेत्यादि— शुश्रूषा श्रोतुमिच्छा । तस्यां श्रवणम् आसेवा । तस्मिन् सति श्रुतानाम् अर्थानाम् अवधारणं ग्रहणम् । ग्रहीतानां धारणम् अविस्मरणम् । धारितानां विविधसाध्यसाधनस्वरूपज्ञानादिभिर्विवेकज्ञानं विज्ञानम् । विज्ञातानामर्थप्राप्तस्य उपादानम् ऊहः । (p.15)

लाभे पालने चेति । लाभनिमित्तं पालननिमित्तं च । 'निमित्तात् कर्मयोगे' इति सप्तमी । लाभो नवो भूतपूर्वः पित्र्यश्चेति । पालनमपि स्वेभ्यः परेभ्यश्चेति द्विविधम् । .........

तद् यथा— अतिदानेन धर्मोऽर्थं हत्वा कामं धर्मान्तरं च हन्ति । तपश्च अत्यन्तसेवितं कामं हत्वा शरीरक्षयाद् धर्मार्थौ हन्ति । तथा अर्थस्तादात्विकोऽप्युपादीयमानः ऐलस्येव धर्मकामौ हत्वा अर्थमपि हन्ति । कामः पुनरत्यासेव्यमानः......शरीरक्षयादात्मानमपि हन्ति । (p. 18)

स्वाध्यायः । यस्मिन् वेदे व्रतं चरति स एवाध्येय इति स्वग्रहणम् । ......एवं तावद् वेदब्रह्मचारिणं उपकुर्वाणस्य आ समावर्तनात् । आ मरणान्तात्तु नैष्ठिकस्य । तस्य विशेषमाह— गुरौ आचार्यकुले प्राणान्तिकी स्थितिः अवस्थानम् । प्राणा एवान्तोऽवधिरस्या इति विग्रहः । (p. 33)

शुश्रूषेत्यादि— श्रवणार्हेषु श्रोतुमिच्छा शुश्रूषा । तस्यां सत्यां श्रवणम् आसेवा । श्रुतानामर्थानामवधारणं ग्रहणम् । धारणं ग्रहीतानाम् अविस्मरणम् । धारितेष्वर्थेषु विविधसाध्यसाधनस्वरूपविवेकज्ञानम् अर्थविज्ञानमिति धारणानन्तरं द्रष्टव्यम् । श्लोकानुरोधात् तत्र न पठितम् । ज्ञातेष्वर्थप्राप्तस्य उल्लिङ्गनम् ऊहः । (p. 53)

उपार्जने पालने च भूमेरिति मुख्यं प्रयोजनम् । 'निमित्तात् कर्मयोगे' इति सप्तमी । भूमिर्मनुष्यवती । तस्या आजर्नं त्रिविधम्— नवं भूतपूर्वं पित्र्यं च । रक्षणं द्विविधम्— स्वेभ्यः परेभ्यश्च ।

ननु चोभयोरपि पक्षयोर्वर्धनस्य तीर्थप्रतिपादनस्य च असंग्रहात् कथं प्रतिपत्तिः? यथा वक्ष्यति—'रक्षितवर्धनी, वृद्धस्य तीर्थप्रतिपादनी च' इति । सत्यम् । किञ्च अस्यैव विशेषनिर्देशोऽयम् । रक्षितवर्धनमप्यार्जनमेव । तीर्थप्रतिपादनमपि गुणवति पुत्रादौ निक्षेपः, अश्वमेधादौ वा विनियोगः । तदपि रक्षणमेव । तस्मादुभयमपि पालनान्तर्भूतमेव द्रष्टव्यम् । (pp. 3-4)

ननु रक्षितवर्धनं वृद्धस्य च तीर्थप्रतिपादनमप्यस्ति । सत्यम् । अस्य द्वयस्यैव विशेषोऽयम् । यतो रक्षितविवर्धनमप्यार्जनमेव । तीर्थप्रतिपादनमपि गुणवति पुत्रे निक्षेपः, अश्वमेधादौ विनियोगो वा, तदुभयमपि सर्वथा रक्षणमेव । (p. 5)

A careful study of the two commentaries tends to show that the author of the *Jaya* on the *Arthaśāstra* also wrote a short commentary on the *Nītisāra* of Kāmandaka to suit that metrical abridgement. The *Jaya* on Kāmandaka is edited with the help of six manuscripts, all obtained from the Kerala country, and it is ascribed there to one Śaṅkarārya in the colophons.

The *Kāmaśāstra* of Vātsyāyana is written on the model of the *Arthaśāstra* in its external set-up and method of treatment. The *śāstra-prayojana* (utility of the science) enunciated in the introductory portion of the *Kāmaśāstra-Jaya* bears close similarity with the corresponding section of the *Arthaśāstra-Jaya*. Similar ideas, passages and illustrations also occur in the *Jaya* on the *Arthaśāstra* and in the *Jaya* on the *Kāmaśāstra*. A few parallels are given to illustrate the point:

*Jaya on Arthaśastra*

येषामपि शास्त्रविदां केषाञ्चिद् अपनयाद् अनर्थेन योगः स तेषामेवापराधो न शास्त्रस्य । नोलूकः पश्यतीत्यनेनं नादेतव्यम् । प्रतिपत्त्रपराधाच्च शास्त्रानर्थक्यं सर्व(शास्त्रेषु ? त्र) तुल्यं स्वर्गारोग्यापवर्गार्थेषु शास्त्रेषु ।

*Jaya on Kāmaśāstra*
(Edn. Kashi Skt. Series, No. 29, 1929)

यदपि कामशास्त्रविदां केषाञ्चित् व्यवहाराकौशलं तत् तेषामेव दोषः, न शास्त्रस्य । .... प्रतिपत्तृदोषाच्च शास्त्रानर्थक्यं सर्वत्र तुल्यम् । न हि चिकित्सार्थेषु शास्त्रेषु सर्वे तद्विदः पथ्याहारादिकं सेवन्ते, तस्मात् तदर्थिनो ये

न सर्वे तद्विदः धर्माधर्मसेवापरिहारयोः पथ्यापथ्याहारसेवासेवयोः रागादिहानौ तत्त्वज्ञाने च अभिनिविशमाना दृश्यन्ते । ये तदर्थिनो भक्तिश्रद्धान्विताः, तेऽपि शास्त्राणां प्रयोजनहेतवः । (p. 6)

शास्त्रं चेदं स्वपरमण्डलभेदाद् द्विधावस्थितं, तन्त्रम् आवापश्चेति ।.... तन्त्रावापाभ्याम् असिद्धेऽर्थे उपनिषत्प्रयोग इत्यन्ते वचनम् । तदुभयमपि तन्त्रावापान्तर्भूतमेव द्रष्टव्यम् । (p. 7)

प्रकरणाधिकरणसङ्ख्यानमन्यनिरपेक्षार्थम् । (p. 7)

'समासवाक्यं समुद्देशः', 'व्यासवाक्यं निर्देशः' इति । अस्य च प्रयोजनम् अध्येतॄणां विदितशास्त्रार्थप्रकरणानुपूर्विकाणाम् असंमोहेन अध्ययने प्रवृत्तिः । यथाभिलषितप्रकरणार्थप्रत्यवमर्शश्च प्रज्ञासमाना भविष्यति । एवं च कृत्वोक्तम् व्यासेन, 'इष्टं हि विदुषां लोके समासव्यासभाषणम्', इति । (p. 6)

भक्तिश्रद्धान्विताः, तेऽपि शास्त्रप्रयोजनहेतवः । (p. 2)

शास्त्रं चेदं तन्त्रम् आवापश्चेति द्विधा स्थितम् । .................. औपनिषदिकं तु तन्त्रावापाभ्याम् असिद्धे व्याप्रियत इत्यन्ते वक्ष्यति । तदुभयमपि तन्त्रावापान्तर्गतमेव तदङ्गत्वात् । (p. 9)

प्रकरणाधिकरणसङ्ख्यानमन्यनिरपेक्षार्थम् । (pp. 9-10)

'इष्टं हि विदुषां लोके समासव्यासभाषणम्' ।....सङ्क्षेपविस्तराभ्यां शास्त्रस्य मनसि धारणमिष्टम् । प्रज्ञातप्रकरणार्थक्रमत्वाद् असंमोहः यथाभिलषित - प्रकरणार्थ - प्रत्यवमर्शश्च स्यात् । (p. 10)

The legends of kings who had perished from excessive passion occur more or less in similar words in the *Jaya* on the *Arthaśāstra* and in the *Jaya* on the *Kāmandaka.* Those of Dāṇḍakya Bhoja and Aila Purūravas among them, are found in the *Jaya* on *Kāmaśāstra* also. Both the *Jaya* on *Arthaśāstra* and the *Jaya* on *Kāmaśāstra* quote in a similar context the stanzas, "ग्रहनयनवसुसमेतम्"[1] and 'अजीर्णे भुज्यते

---

1. *Artha-Jaya,* p. 39, and *Kāma-Jaya,* p. 35.

यच्च'[1]. The manuscripts of *Jaya* on *Kāmaśāstra* do not reveal the name or the author; Aufrecht however mentions in his *Catalogus*, p. 256 a commentary on the *Kāmaśāstra* of Vātsyāyana by Śaṅkarācārya (cf. *Indian Literature* by Weber, note on p. 267).

The *Jaya* on the *Bhaṭṭikāvya* (hereafter referred to as *Bhaṭṭi*) is quoted as authority in the *Amaraṭīkāsarvasva*, *Durghaṭavṛtti* (1175 A.D.), the *Nānārthārṇava* of Keśavasvāmin (1200 A. D.) and in later works but none of them mentions the name of the author. The *Dhātuvṛtti* of Mādhavācārya (1380 A.D.) quotes a passage from a commentary on *Bhaṭṭikāvya* by one Śrīkarācārya in support of the view that the causal of the root *'grah'* (to take hold of) does not govern double accusative. *cf.*

"तथा श्रीकराचार्यस्याप्यनभिमतम् उपादानार्थस्य द्विकर्मकत्वम्। 'अजिग्रहत्तं जनक': (II. 42) इति भट्टिश्लोकं विवृण्वन् यदाह—तद् धनुः तं रामं जनकोऽजिग्रहद् बोधितवान्—अनेन धनुषा त्रिपुरं दग्धमिति। ग्रहेश्च बुद्ध्यर्थत्वाद् 'गतिबुद्धि' इत्यादिना रामस्य कर्मसंज्ञा, धनुषस्तु 'कर्तुरीप्सिततमम्' इति ग्रहिः द्विकर्मकः। उपादानार्थत्वे तु ग्रहिर्गत्यादिष्वेकोऽपि न भवतीति कथं तमिति"। (Mysore Edn., p. 96). The words ascribed to Śrīkarācārya in the above quotation agrees with the text of the *Jaya* on *Bhaṭṭi* in the relevant context:

"तद् धनुः तं रामं जनकः अजिग्रहद् बोधितवान्—अनेन धनुषा त्रिपुरं दग्धम् इति........ग्रहेश्च बुद्ध्यर्थत्वाद् 'गतिबुद्धि' इत्यादिना रामस्य कर्मसंज्ञा"। (II. 42, N. S. Press edn., p. 33). From these two citations, it appears that the author of the *Jaya* on *Bhaṭṭi* is one Śrīkarācārya. But Aufrecht mentions a commentary on *Bhaṭṭi* by Śaṅkarācārya as quoted in the *Dhātuvṛtti* of Mādhava (C.C. I. 395), and it is certain therefore that there was a reference to a commentary by Śaṅkarācārya on *Bhaṭṭi* in the manuscript of *Dhātuvṛtti* consulted by Aufrecht. The latter reading is confirmed by a palmleaf manuscript of the *Bhaṭṭi-Jaya* in the Trivandrum Palace Library which begins with the stanzas:

---

1. *Artha-Jaya*, p. 64, and *Kāma-Jaya*, p. 42.

स्वाख्यानाढ्यो विचित्राक्षरललितपदः संगृहीतार्थराशिः
शुद्धालंकारहारी सकलगुणनिधिर्निर्जिताशेषदोषः ।
विद्वत्प्रीतिप्रदेयो महितहरिभवः सर्वलक्ष्यानुगामी
शश्वल्लोकप्रसिद्धो नृपतिरिव महान् काव्यबन्धश्चकास्ति ॥

संपन्ना सकलेन लक्षणगुणेनोद्दीपितालंकृति-
र्युक्तार्थानुगतप्रसन्नमधुराभिप्रायसंवादिनी ।
श्रीमच्छंकरपूज्यपादयतिना टीका निबद्धा स्वयं
तस्यैषा जयमङ्गलेति गदिता कान्तेव भात्यद्भुता ॥

प्रणिपत्य सकलवेदिनमतिदुस्तरभर्तृकाव्यसलिलनिधेः ।
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥

Its ending colophon runs thus: इति सत्कविचूडामणिगोविन्दस्वामिसूनु-हरिस्वामिविरचित-महाकाव्य-टीकायां भगवच्छंकरपरमहंसपरिव्राजकनिगदितायां जयमङ्गलायां तिङन्तकाण्डे लुड्विलसितं नाम नवमः परिच्छेदः । काव्यस्य अयोध्याप्रत्यागमनं नाम द्वाविंशः सर्गः ॥

जटीश्वरो जयदेवो जयमङ्गल इत्यपि ।
यस्य ख्यातिस्त्रिधा लोके टीका तेन कृता त्वियम् ॥

The excerpts given above make it clear that the author of *Jaya* on *Bhaṭṭi* was one Śaṅkarapūjyapādayati, also called Śaṅkarācārya, and that he came to be called Jaṭīśvara, Jayadeva and Jayamaṅgala. But only the last name which is the name of his commentary has survived. The ending colophon occurring in the N. S. Press edition of the *Jaya* on *Bhaṭṭi* adds that the author wrote commentaries on many śāstras (*anekaśāstra-vyākhyānakṛt*).

The *Jaya* on the *Sāṅkhykārikā* is edited[1] from two manuscripts from Malabar and the closing colophon ascribes the work to Śaṅkarācārya who is described as '*paramahaṁsa parivrājaka*' and as a disciple of Govinda Bhagavatpāda[2].

---

1. *Calcutta Oriental Series* No. 19.

2. इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीगोविन्दभगवत्पूज्यपादशिष्येण श्रीशङ्कर-भगवता कृता साङ्ख्यसप्ततिटीका समाप्ता ।

Prof. Hiriyanna[1] and S. S. Suryanarayana Śastri[2] consider this commentary to be older than the *Sāṅkhyatattvakaumudī* of Vācaspati Miśra (840 A.D.).

All the five commentaries show erudition in grammar and contain several allusions of interest and value claiming high antiquity. The *Jaya* on *Bhaṭṭi* says that, of the three wives of Daśaratha, Kausalyā and Kaikeyī were of the Kṣatriya caste and Sumitrā was born of parents through intermarriage and was their *paricārikā*. They parted in her favour a portion each from their share of the oblation of rice that made them all conceive.[3] None of these *Jayamaṅgalās* have been critically edited and it cannot be said that the texts in them have come down to us without accretion or adulteration in the course of transmission through centuries. The *Jaya* on *Kāmandaka* mentions at one place Puṣkara as having defeated his brother Nala in gambling[4] and at another Jayasena (more properly Jayatsena) defeating his brother Nala.[5] *Kauṭalya* refers to Jayatsena as a winner in gambling and Nala as a loser and from this H. Jacobi argues[6] that the original name of Nala's brother was Jayatsena and that it was changed into Puṣkara in a later version of Nala story in the *Mahābhārata* and the *Jaya* on *Kāmandaka* strengthens the argument.

To sum up, there are parallels and agreements in the five commentaries and they are more striking in the *Arthaśāstra*

---

1. *Cf. JOR* III. 107-112.

2. *Cf. Sāṅkhyakārikā of Īśvarakṛṣṇa*, University of Madras 1935, p. 97.

3. कौसल्या कैकेयी च क्षत्रिये, सुमित्रा तु वर्णसङ्करजा......... तत्र कौसल्या कैकेयी च एकैकं पिण्डं प्राशितवत्यौ, ताभ्यां च आवयोः परिचारिकेति पिण्डभागद्वयं दत्तम् सुमित्रा प्राशितवती । (I. 13).

4. नलो राजा सह भ्रात्रा पुष्करनाम्ना अक्षैर्दीव्यन् सर्वं राज्यमपहारितवान् । (I. 56).

5. नलश्च राजा द्यूतेन हृते राज्ये भ्रात्रा जय[से ? त्से]नेन धर्मदारान् दमयन्तीं वने त्यक्त्वा परकर्मकरोऽभवत् । (XV. 51).

6. *IA* LIII (1924) 144.

and the *Kāmandaka* commentaries. The other three are on different subjects, *viz.*, *Kāmaśāstra*, *Śāstra-kāvya* on Vyākaraṇa and *Sāṅkhya*, wherein we cannot expect very perceptible parallels. Even if this may not form conclusive evidence to the identity of authorship of all these commentaries, surely it points to such a conclusion.

In the edition of *Arthaśāstra Jaya* that follows, for facilitating reference to the Mysore (M), second edition, and Trivandrum (T) edition of the text, the page numbers of these two editions are given in brackets before the first word commented from the respective pages.

In editing this important work, I am indebted to Dr. V. Raghavan for giving me facilities for bringing it out as a publication of the Kuppuswami Sastri Research Institute. I am thankful to him also for valuable suggestions in the course of its publication. In seeing this work through the press, I have been helped by Sri K. V. Sarma and to him also my thanks are due. I take this opportunity to acknowledge the help I have received from the Government Oriental Manuscripts Library, Madras, in making available to me for consultation their transcript of *Jayamaṅgalā* on the *Arthaśāstra*.

MADRAS,<br>25-4-1958.

G. HARIHARA SASTRI

श्रीः

# कौटलीयार्थशास्त्रव्याख्या

# जयमङ्गला

## विनयाधिकारिकम् - प्रथमम् अधिकरणम् ।

पूर्वमतानि यथेदं संगृह्यैकं चकार कौटल्यः ।
टीकान्तराणि दृष्ट्वा सद्व्याख्यानं समुद्धृत्य ॥
क्रियते तथा मयापि त्यक्त्वा च ग्रन्थविस्तरं पूर्णा ।
बालहिता टीकेयं दुर्ज्ञेयं यद् वितत्य सर्वमिदम् ॥

T.1; M.1. प्रेक्षावतां पूज्यपूजनात् सर्वारम्भा अविघ्नितप्रसरा भवन्तीति मन्यमान आह—नमः शुक्रबृहस्पतिभ्याम् इति । पूज्याश्च वक्तृत्वप्रयोक्तृत्वैश्वर्ययोगात् त्रिविधाः । तत्र ये शास्त्राणां वक्तारः, ते तच्छास्त्रव्यवहारिभिः पूज्यन्ते । ये शास्त्रार्थानां प्रयोक्तारः, ते तन्त्रानुवर्तिभिः पूज्यन्ते । ये च अणिमाद्यैश्वर्ययुक्ताः, ते दृष्टादृष्टार्थानुग्राहिणो देवा अत्यन्तं पूज्यन्ते । अनयोश्च त्रितयमपि पूजनीयत्वनिमित्तमस्ति । तत्र कृत्स्नशास्त्रप्रणयनाद् वक्तारौ, देवासुराणां च सन्धिविग्रहप्रयोगात् प्रयोक्तारौ, ऐश्वर्ययोगाच्च देवौ इति मन्यमान इह कौटल्यस्तावेव नमस्कृतवान् । नमःशब्दयोगाच्चतुर्थी । नमः-शब्दश्च मानसीं भक्तिम् अनुमापयति । पाण्यादीनां साधनानां बाह्यां पूजां प्रदर्शयति । अत्र "आनङ्ऋतो द्वन्द्वे" (५-३-२५) "देवताद्वन्द्वे च" (६-३-२६) इति नानङ् । पुनर्द्वन्द्वग्रहणात् पूर्वनिर्दिष्टानामेवेति स्थितेः । यथा सूर्याचन्द्रमसोरिति चन्द्रसूर्ययोरिति च व्यवहारौ । ततश्च शुक्रस्याल्पाच्-तरत्वात् पूर्वनिपातः । शास्त्रारम्भे प्रयोजनमाह—पृथिव्या इति । अन्यथा अनुक्तप्रयोजने प्रेक्षावताम् अप्रवृत्तेः । पृथिव्या इति तत्स्वभावाया विस्तीर्णरूपाया इत्यर्थः । अनेन शास्त्रस्य महाविषयताम् आह—लाभे पालने चेति । लाभनिमित्तं पालननिमित्तं च "निमित्तात् कर्मसंयोगे" (वा. २.३.३६) इति सप्तमी । (लाभो)"नवो भूतपूर्वः पित्र्यश्चेति" (अधि. १३. अध्या. ५) । पालनमपि स्वेभ्यः परेभ्यश्चेति द्विविधम् । विषयसप्तमी वा, शास्त्रस्य अन्यत्राभावात् । ननु चोभयो-रपि पक्षयोर्वर्धनस्य तीर्थप्रतिपादनस्य चासंग्रहात् कथं प्रतिपत्तिः । यथा

वक्ष्यति—"रक्षितवर्धनी वृद्धस्य तीर्थप्रतिपादनी च" (अधि.१.अध्या.४) इति । सत्यम् । किन्त्वस्यैव विशेषनिर्देशोऽयम् । रक्षितवर्धनमप्यार्जनमेव, तीर्थप्रतिपादनमपि गुणवति पुत्रादौ निक्षेपः, अश्वमेधादौ वा विनियोगः । तदपि हि रक्षणमेव । तस्मादुभयमपि पालनान्तर्भूतमेव द्रष्टव्यम् । यावन्तीति यावत्प्रमाणानि साकल्यार्थं वचनम् । अर्थशास्त्राणीति अर्थो येन लोको वर्तते तदर्थं शास्त्रमिति । यद्येवं वार्ताशास्त्रं तत्, न नीतिशास्त्रम् । यस्माद् भूमिहिरण्यधान्यपशुभाण्डोपस्करादिरर्थः अमुत इति कृत्वा, ते न नीतिशास्त्राणीति वक्तव्यम् । सत्यम् । प्राधान्यादेवमुक्तम् । यतो भूम्यादीनामर्थानां पूर्वः पूर्वः प्रधानम् । अर्थः प्रधानं च मनुष्यवती भूमिः, सर्वकर्मणां योनित्वात् । वक्ष्यति च तन्त्रयुक्तौ—"मनुष्याणां वृत्तिरर्थः, मनुष्यवती भूमिरित्यर्थः । तस्या मनुष्यवत्या भूमेः पृथिव्याः लाभपालनोपायभूतं शास्त्रमर्थशास्त्रमिति" (अधि.१५.अध्या.१) । वृत्तिरर्थ इति वर्तनहेतुत्वात् । पूर्वाचार्यैरिति । पूर्वग्रहणं प्रकर्षार्थत्वाद् बृहस्पत्याद्युपसंग्रहार्थम् । आचार्यैरिति, न यैः कैश्चित् । T. 1. प्रस्थापितानि प्रवर्तितानि । प्रायश इति प्रतिषेधार्थम् (?) । अनेन सामान्येनार्थशास्त्रस्य प्रयोजनमुक्तम् । तेषु सत्सु पुनरारम्भोऽनर्थक इति चेदाह—तानीति । संहृत्य ततः स्तोकं स्तोकं परित्यज्य । इयांस्तु विशेषः । अत्र यत् केषांचिन्मतमनुमतं यथा "सर्वमुपपन्नमिति कौटल्यः" । केषाञ्चिन्नानुमतं यथा "नेति कौटल्यः" इति । एकमिति अनपेक्षित-सहायान्तरम् । इदमिति बुद्धिस्थमाह । पुनरर्थशास्त्रग्रहणं प्रसङ्गतो धर्माद्युप-देशेऽपि अर्थोपदेशः प्रधानमिति प्रकाशनार्थम् "अर्थमूलौ हि धर्मकामौ" (अधि.१.अध्या.७) इति । कृतमिति शास्त्रपरिसमाप्तिमाशंसते । "वृष्टश्च देवो निष्पन्नाः शालयः" इति यथा । प्रपञ्चित(विचित्र ? त्रि)वर्गाणि पूर्वाचार्य-प्रणीतशास्त्राणि संक्षिप्य अल्पेन ग्रन्थेन यदर्थकथनं तदस्य प्रयोजनम् । ऐदंयुगीनानां पूर्वशास्त्राध्ययनासामर्थ्यात् । तथा चोक्तम्—

" ब्रह्माध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् ।
तच्छंकरेण शक्रेण गुरुणा भार्गवेण च ॥
संक्षिप्तं मनसा चैव बहुभिश्च तपोधनैः ।
प्रजानामायुषो ह्रासं विज्ञाय च महात्मना ॥
संक्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये ।"

इति । संबन्धस्तु प्रयोजनस्य शास्त्रस्य प्रतिपाद्यप्रतिपादकलक्षणः, स च तदन्तर्गतत्वात् पृथङ् नोक्तः । सामान्यं तु प्रयोजनमस्य अस्त्येव । अत्र

केचिदाहुः—धर्मस्य अलौकिकत्वादभिधायकं शास्त्रम्, अर्थस्योपायपूर्वकत्वाद् उपायस्य च शास्त्रपूर्वकत्वात् तद् युक्तं तदर्थवार्ताशास्त्रम्। नीतिशास्त्रं तु न युक्तम्, यतो नीतिशास्त्रमनर्थकमिति । प्रत्यक्षानुमानागमप्रमाणदेशकालशक्तिपुरस्सरार्थविनियोगलक्षणा क्रिया नीतिः । सा प्रेक्षावतां दृश्यते । नीतिं विना पशूनां तत्कल्पानाञ्च बालानाम् आत्महिततृणस्तन्याहारप्राप्तिरभिहिता । शीतोष्णवातवर्षादिपरिहारश्च फलम्। तथानधीतशास्त्राणामपि म्लेच्छादीनां जलारण्यान्तरिक्षवर्तिमीनमृगपक्षिबन्धनार्थसाधनविनियोगलक्षणा नीतिः । तथा अशास्त्रविदां तुल्येऽपि शास्त्रे केषाञ्चिद् अर्थेन योगोऽन्येषामनर्थेनेति । अत्रोच्यते—

"नीतेर्विना फलं नास्ति शास्त्रेणैकान्तिको नयः ।
शास्त्रे सत्यपि नावश्यमिति सर्वेष्वदः समम् ॥"

इति । पशवो हि मनुष्यप्रयुक्तैः पाशकूटादिभिरुपहन्यमानाः पाशादिविमोचनाकुशलाः विनाशम्, बालाश्च परिहारानभिज्ञाः सर्पाद्युपद्रवादिकम् आसादयन्तो नीतेर्विना दृश्यन्ते । अतो नीतेर्विना फलं नास्ति । अनधीतशास्त्राणामपि यत् कदाचित् हिताहितप्राप्तिवर्जनं तदपि यादृच्छिकीं नीतिमेवासाद्य भवति । सा चैवंविधा नीतिर्घुणाक्षरकल्पत्वादनाश्वासा । अपनयबाहुल्याच्चैते शास्त्रविद्भिरुदासीक्रियन्ते । शास्त्रेण तु सम्यक्करणीयवर्जनीयवर्जनादैकान्तिकत्वं नीतेः क्रियते । (उप)देशादिष्वप्य(पि स्व ?)भावपरिच्छेदोऽप्येषां यदा भवति तदा प्रामाण्यमन्येभ्य एव । तथा हि—

"उपदेशाद् अनायोगाद् वासनानुगमादपि ।
परयत्नाद् अदृष्टाद् वा सर्वाः सर्वत्र वृत्तयः ॥"

इति । येषां हिताहितप्राप्तिपरिहारौ क्वचिन्मात्रादिचरितोपदेशापेक्षया-नहीदं कुर्विदं मा कार्षीरिति वाचैव श्रोतॄणां शब्दार्थप्रतिपत्तॄणामुपदेशः, किन्तर्हि अनुकर्तॄणां नाट्योपदेशवदुपदेशः । कदाचिदनायोगात्—यस्यां प्रवृत्तौ बाध्यन्ते न च फलं प्राप्नुवन्ति ततो निवृत्यान्यत्र निराबाधं फलं च किञ्चिल्लभमानाः पौनःपुन्येन इदमतो दुःखम् अन्यथा अदुःखं भवतीति तमोबाहुल्येऽपि यच्च यावच्च प्राकाश्यं लभते । कदाचिद् वासनानुगमाच्च—अनन्तरेषु व्यवहितेषु च जन्मसु दर्शनश्रवणादिभिः सर्वपदार्थस्वभावपरिच्छेदानुभूतलोकयात्राणां यदृच्छोत्पन्नवासनाप्रबोधानां हिताहितवस्तुन्यभिलाषेतरौ भवतः । ततश्चाभिप्रेतलाभः परिहारश्च । कदाचित् परप्रयत्नात्—उपकरणसम्पदायत्तमात्मोपकारं मन्यमानो गोवत्सादिवदनं मातुरूधःप्रवेशं योजयन् स्वार्थं साधयति । सान्येषां च

परनीत्यपेक्षया प्रवृत्तिः साफल्यं लभते । कदाचिददृष्टात्—पूर्वदेहोत्पन्नौ धर्माधर्मौ प्रत्युत्पन्नपरिपाकौ देहकारणानां सन्निवेशविशेषरचनायाः कारणीभवतः । एवमिष्टानिष्टफलप्राप्तिपरिहारनिमित्ताय प्रवृत्तिविशेषः अनन्ताय पुरुषतर्कागोचराय तावेव प्रभवत इति न किञ्चिद् अनिमित्तं फलमस्ति । येषामपि शास्त्रविदां केषाञ्चिद् अपनयाद् अनर्थेन योगः स तेषामेवापराधो न शास्त्रस्य । नोलूकः पश्यतीत्यादिन्येन नोदेतव्यम् । प्रतिपत्त्रपराधाच्च शास्त्रानर्थक्यं सर्वशास्त्रेषु तुल्यं स्वर्गारोग्यापवर्गार्थेषु शास्त्रेषु । न सर्वे तद्विदो धर्माधर्मसेवापरिहारयोः पथ्यापथ्याहारसेवासेवयोः रागादिहानौ तत्त्वज्ञाने चाभिनिविशमाना दृश्यन्ते । ये तदर्थिनो भक्तिश्रद्धान्वितास्तेऽपि शास्त्राणां प्रयोजनहेतव इत्यन्यशास्त्रवद् इदमप्यादरणीयमिति ॥

शास्त्रप्रणयनं च द्विधा समुद्देशतो निर्देशतश्च । तत्र स्वरूपसङ्ख्याभ्यां पूर्वमधिकृत्याह—तस्येति संक्षिप्तस्य शास्त्रस्य । अयमिति प्रकरणानामधिकरणानां च समुद्देशः समासवचनम् । वक्ष्यति—"समासवाक्यं समुद्देशः", "व्यासवाक्यं निर्देशः" (अधि.१५.अध्या.१) इति । अस्य च प्रयोजनम् अध्येतॄणां विदितशास्त्रार्थप्रकरणानुपूर्वीकाणाम् असंमोहेन अध्ययने प्रवृत्तिः यथाभिलषितप्रकरणसार्थप्रत्यवमर्शश्च प्रज्ञासमाना भविष्यतीति । एवं च कृत्वोक्तं व्यासेन—

"इष्टं हि विदुषां लोके समासव्यासभाषणम् ।"

(कामसू.अधि.१.अध्या.१)

इति । विद्यासमुद्देशादयश्च यथाप्रस्तुतार्थनिमित्तनामानः । निर्वचनं च यथानिर्देशं वक्ष्यामः । प्रक्रियन्त इति प्रकरणानि अर्थाः । ग्रन्थभागास्तु तत्साहचर्यात् तन्नामानः प्रकरणार्थाधारत्वात् । अधिकरणानि अधिक्रियन्त एष्विति तानि च यथायथमुपात्तनिमित्तभेदसमाख्यानि । M.4. तथा विनयाधिकारोऽस्मिन्निति विनयाधिकारिकम् । तथा व्यसनाधिकारिकम् । T.9. M.2; अध्यक्षाः प्रचरन्त्यनेनेति अध्यक्षप्रचारः T.11; धर्मस्थेभ्यो हितं तद्व्यापारोपदेशादिति धर्मस्थीयम् । T.12; M.3. कण्टकाः शोध्यन्तेऽनेनेति कण्टकशोधनम् । T.13. योगः प्रच्छन्नयोगः तस्य प्रवर्तनं योगवृत्तम् । T.14. मण्डलयोनिर्मण्डलज्ञानकारणम् । T.17; M.4. षडेव गुणाः षाड्गुण्यम् । चातुर्वर्ण्यवत् । T.19. अभियास्यतः कर्म अभियास्यत्कर्म । T.21. M.5. सङ्ग्रामा अत्र भवन्तीति साङ्ग्रामिकम् । T.23. अबलीय-

सामिदम् आबलीयसम् । दुर्गलाभस्योपायो दुर्गलाभोपायः । लम्भ इत्यपप्रयोगः "उपसर्गात् खल्घञोः" (७-१-६७) इति नियमात् । T.24. उपनिषद् रहस्यं तदधिकृत्य कृतम् औपनिषदिकम् । तन्त्रयुक्तयः शास्त्रव्याख्यायुक्तयो बह्वयः, तासां प्रकरणभूतानामाधारत्वात् तन्त्रयुक्तिरधिकरणम् । T.25. इति शास्त्रसमुद्देशः इतिशब्दः परिसमाप्त्यर्थः । शास्त्रस्य प्रकरणाधिकरण-स्वरूपस्य संक्षेपेणोद्देश उक्तः । प्रकरणानामधिकरणानां चानुपूर्वी यथानिर्देशं वक्ष्यामः । इदानीं स्पष्टार्थं सङ्ख्यया शास्त्रसमुद्देशमाह—पञ्चदशेति । तत्र प्रकरणाधिकरणसङ्ख्यानमन्यनिरपेक्षार्थम् । अध्यायसङ्ख्यानं न प्रकरणवशादेष इं सङ्ख्येति दर्शनार्थम् । यतो विगृह्यासनादीनि बहूनि प्रकरणान्येकोऽध्यायः विद्यासमुद्देशः प्रकरणमेकं त्रयोऽध्याया इति । श्लोकसङ्ख्यानमहीनाधिकत्व-ज्ञापनार्थम् । M.6. सुखग्रहणमित्यादिवचनमध्येतृप्रोत्साहनार्थम् । सन्निवेशत्वात् सुखेन ग्रहणं पठनं यस्मिन्निति सुखग्रहणम् । स्पष्टार्थत्वात् सुखेन विज्ञेयमव-गतिर्यस्मिन्निति सुखविज्ञेयम् । यतस्तत्त्वार्थैः निश्चयो यस्मिन्निति । विमु ं चास्मिन् ग्रन्थगौरवम् । अतःकालातिपातोऽपि नास्ति । कुटलं नाम गोत्रं तस्यापत्यं कौटल्यः । "गर्गादिभ्यो यञ्" (४-१-१०५) स्वगोत्रकीर्तनं च कीर्त्यर्थम् । तथा चाहुः—

"दिवं स्पृशति भूमिं च शब्दः पुण्यस्य कर्मणः ।
यावत् स्वशब्दो ध्रियते तावत् स्वर्गे महीयते ॥"

इति । शास्त्रं चेदं स्वपरमण्डलभेदाद् द्विधावस्थितं तन्त्रमावापश्च (इति) । स्वकुटुम्बधारणात् तन्त्रम् । "तत्रि कुटुम्बधारणे" इति धातुपाठात् । तच्च अध्यक्षप्रचारादि योगवृत्तान्तम् । परस्माच्छक्तयः सिद्धयश्चात्मनि समन्तादुप्यन्ते व्यस्यन्ते येनासावावापः । स च मण्डलयोन्यादिदुर्गलाभोपायान्तः । तदुभयमपि अविनीतस्य न प्रवर्तत इति आदौ विनयोपदेशः । तन्त्रावापाभ्यामसिद्धेऽर्थे उपनिषत्प्रयोग इत्यन्ते वचनम् । तदुभयमपि तन्त्रावापान्तर्भूतमेव द्रष्टव्यम् । शास्त्रमपि व्याख्यायुक्तिं विना न शक्यते व्याख्यातुमिति तन्त्रयुक्तिः शास्त्रस्य अलङ्कारभूता अन्ते समुपदिष्टा । तथा चोक्तम्—

"सूत्रवाक्यसमीक्षाभिः श्लोकैः शास्त्रस्य तद्विधिः ।
अलङ्काराश्च तस्योक्ता द्वात्रिंशत् तन्त्रयुक्तयः ॥
अर्थस्य सूचनात् सूत्रं वाक्यं च पदसंहतिः ।
अन्तर्भाव्या समीक्षा स्याच्चतुष्पाच्छ्लोक उच्यते ॥"

इति । शास्त्रं चेदं समीक्षाभिः विरचितत्वात् समीक्षाशास्त्रम् इत्याहुः । शास्त्र-समुद्देशश्च प्रथमं प्रकरणं विनय एवान्तर्भूतम् । यतो वक्ष्यति—"शास्त्रार्थानुष्ठानं

वेन्द्रियजयः" (अधि.१.अध्या.६) इति । ततश्च संक्षेपेणापि कृत्स्नं शास्त्रमनुष्ठेयम् इन्द्रियजय इति समुद्देशो विनये निक्षिप्तः ॥

इति शास्त्रसमुद्देशः प्रथमं प्रकरणम् ।
प्रथमश्चाध्यायः ॥

## अथ द्वितीयोऽध्यायः

T.26; इदानीं निर्देशतः शास्त्रं प्रस्तूयते । तत्रेदं शास्त्रं किमधिकृत्येत्यत्राह—**राजवृत्तिरिति** । अधिक्रियते । सर्वमेतच्छास्त्रं राजवृत्तिः राजानेन वर्तत इति कृत्वा । यतः पुरुषकारो ज्ञानकर्मलक्षणः, ज्ञानपूर्वकं कर्म, ज्ञानं शास्त्रपूर्वकमिति । अमात्यादयोऽप्यनेन वर्तन्त इति चेन्न । तेषां राज्ञैव उह्यमानत्वात् । अथवा तन्त्रमधिकृत्य अयम् अधिकारः । कृत्स्नस्य शास्त्रस्य राजवृत्तित्वेऽपि विशेषग्रहणं स्वकुटुम्बविषयख्यापनार्थम् । यतोऽनपेक्षितपरमण्डला स्वतन्त्रवृत्तिः । अथवा एतद् विजिगीषोर्वृत्तिः, यतो वक्ष्यति मण्डलयोनौ—"राजा आत्मद्रव्यप्रकृतिसम्पन्नो नयस्याधिष्ठानं विजिगीषुः" (अधि.६.अध्या.२) इति । अथवा इदमेवाधिकरणं प्रत्यधिक्रियते, साक्षाद् राज्ञो व्यापाराभिधानाद् विनयाधिकारिकस्य । अथवा विद्यासमुद्देशमेव प्रकरणं प्रत्यधिक्रियते प्रसिद्धिनिरासार्थम् । यतः सन्न्यासिनाम् आन्वीक्षिकी, धर्मप्रधानानां गृहस्थादीनां त्रयी, विशां शूद्राणां च वार्ता, राज्ञां दण्डनीतिरिति । अत आह—**राजवृत्तिरान्वीक्षिकी**त्यादि । तेन विनयाधिकारे प्रथमम् अयं विनयो यद् विद्योपासनमिति । शास्त्रसमुद्देशानन्तरं विद्यासमुद्देश उच्यत इति प्रकरणक्रमः । ये तु उद्देशापेक्षया सम्बन्धम् आहुः—यथोद्देशस्तथा निर्देश इति, ते स एवोद्देशः कथमिति प्रष्टव्याः । एताः सर्वा राजवृत्तिः । ताश्चेतरेतरापेक्षाः, न पुनस्तदन्यापेक्षाः । अत एव ज्ञानविद्याधिकाराद् अन्या विद्याः सत्योऽप्यस्मिन् प्रकरणे नोक्ताः । तेन चतस्र एव त्रिभिरध्यायैः समुद्दिश्यन्ते । तत्र सर्वविद्याप्रचारहेतुत्वात् पूर्वमान्वीक्षिकी । वर्णाश्रमाणां धर्मकर्मव्यवस्थापनाद् इतराभ्यां प्राक् त्रयी । प्रजाजीवनहेतुत्वाद् दण्डनीतेः प्राग् वार्ता । दण्डनीतिस्तु राजवृत्तित्वे प्रसिद्धैव सती सादृश्यार्थम् इतराभिः सहानूद्यते । इतिशब्दो व्यवच्छेदार्थः । अत्राचार्याणां विप्रतिपत्तिः । मनोः स्मृतिकारस्य मतम् । शुष्कतर्कस्य तावद् विद्याविरोधाद् अविद्यैव । तद्यथा—

" यदुदुम्बरपर्णानां घटीनां मण्डलं महत् ।
पीतं न गमयेत् स्वर्गं किं तत् क्रतुशतं नयेत् ॥"

इति । तस्मात्,

" हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ।"

इति । यस्तु त्रय्यनुगामी मीमांसादिः, स्मृत्यन्तरानुगामी साङ्ख्यादिस्तर्कः स त्रय्येव । यथाहुः—

" वेदशास्त्राविरोधी तु तर्क(स्त्रय्येव) पश्यताम् ।"

इति । तस्मात् **त्रयीविशेषः** त्रयीभेदः । **मानवा** इति मनोः शिष्याः । ननु च मानवानामिदं मतं न मनोः । नैतदेवम् । तत्प्रोक्तशास्त्राध्ययनादेव ते मानवाः । न तेषां पृथग् दर्शनमस्ति ॥

**बार्हस्पत्या** इति बृहस्पतेः शिष्याः । त एवमाहुः— वार्ता दण्डनीतिफलैव, त्रयी धर्मोपयोगिनी, अतः पृथिव्या लाभपालनयोर्वार्तादण्डनीती एवोपकारिण्यौ । तस्माद् राज्ञो द्वे एव विद्ये । किन्तु वार्तादण्डनीत्योः प्रवर्तमानस्यार्थमात्रपरोऽयं निग्रहरुचिरिति परिवादस्य यत्संवरणं प्रच्छादनं धर्मविजयित्वख्यापनार्थम्, तन्मात्रेणोपयुज्यते । **लोकयात्राविद्** इति लोकव्यवहारविदः । अन्यथा तदुक्तं धर्ममनाचरन् लोको व्यवहाराद् बाह्यः स्यात् । तथा चोक्तम्—

" योगाय वार्ता लोकस्य नीतिः क्षेमाय चोदिता ।
त्रयी तत्रापि मघवन् लोकपक्तिप्रयोजना ॥"

इति ।

T.27. **औशनसा** इति । उशनसः शुक्रस्य शिष्याः । ते हि वार्ताव्यवहारं दण्डनीत्यामेवान्तर्भावयन्ति । ततश्च दण्डनीतिरेव प्रधानम् । यदाह—**तस्या**मिति दण्डनीत्याम् । यस्मात् **सर्वविद्यारम्भाः** सर्वविहितव्यापारा योगक्षेमरूपाः **प्रतिबद्धाः** । तस्या अभावे आरम्भाणामप्रवृत्तेः । यथोक्तम्—

" इयं धर्मार्थकामानां पृथिवीलाभपालना(त्) ।
मे ? वेदिनी नीतिविद्यैव पुरुषार्थस्य साधिका ॥"

इति ।

स्वमतमाह—**चतस्र** इति । यथोपवर्णितपूर्वाचार्यमतसम्भवेऽपि परस्परं विसदृशव्यापारत्वाद् विसदृशस्वरूपत्वाद् विसदृशफलत्वाच्चतस्र एव । तत्र विसदृशव्यापारं दर्शयन्नाह—**ताभि**रिति विचारज्ञानलाभसत्तापादनार्थाभिः ।

यद् यस्मात् कारणात् । धर्माथौ विचार्यश्रेयस्थिरतया राजा विद्यात् जानीयात् । तद् विद्यानां विद्यात्वम् । यतः आन्वीक्षिकी विचारणार्था विन्तेऽनयेति, त्रयी धर्माधर्मज्ञानार्था विद्याद् अनयेति, वार्ता लाभार्था विन्दत्यनयेति, दण्डनीतिः सत्तापादनार्था विद्यतेऽनया रक्षणयोगात्, इति सर्वस्माद् विदेः "(संज्ञायां)समजनिषद्—" (३-३-९९) इति क्यप् । मोक्षो राज्ञां न विवक्षितः । कामोऽप्यर्थप्राप्त इति नोक्तः ॥

विद्यानां स्वरूपभेदात् स्थापनोच्यते । तत्रान्वीक्षिकीमधिकृत्याह—**साङ्ख्यमिति** । सङ्ख्यानं सङ्ख्या विवेकः, तस्या इदं शास्त्रं, साङ्ख्यं षष्टितन्त्रं पञ्चविंशतितत्त्वज्ञानफलम् । **योग**श्चित्तवृत्तिनिरोधः षडङ्गैश्वर्यफलः । यथोक्तम्—

"प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥"

इति । **लोकायतं** बार्हस्पत्यम् । लोकाय बुद्धिं तनोतीति नैरुक्तम् । तदिह लौकिकंसाध्यसाधनोपायफलनिश्चयेऽपि सन्दिग्धपारलौकिकाप्रत्याख्यानोपदेशाय । यथोक्तम्—

"सन्दिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैः ।"

इति । असमासकरणं व्यस्तसमस्तख्यापनार्थम् । आन्वीक्षिकी*............

..............................................................................

इति विद्यासमुद्देशे आन्वीक्षिकीस्थापना ।
द्वितीयोऽध्यायः ॥

## अथ तृतीयोऽध्यायः

T. 29. M. 7. **स्वधर्मस्थापनादिति** । स्वग्रहणमसाधारणधर्मख्यापनार्थम् । तस्य व्यवस्थापनाद् **औपकारिकः** उपकाराय प्रभवति ॥

अतो राज्ञा लोकधर्मा ज्ञातव्या इत्यादिदर्शनार्थमाह—**स्वधर्म** इत्यादि । अयमधिकार उत्तरत्र वर्तते । तत्र ब्राह्मणस्य **यजनं** दर्शपूर्णमासादि । **अध्ययनं** स्वाध्याय एव । **दानं** दक्षिणेति । एतानि कर्माणि धर्माय । याजनाध्यापनप्रतिग्रहास्त्वर्थाय । एते प्रधानभूताः । अन्येऽपि धर्मशास्त्रादवगन्तव्याः । एवमुत्तरत्रापि

* अत्र उपदशा ग्रन्थपङ्क्तयो मातृकायां लुप्ताः ।

योग्यम् । क्षत्रियस्येति । अध्ययनादयो धर्माः, अध्यापनादिषु नाधिकारी क्षत्रियः । शस्त्राजीवः शस्त्रेणाजीवः जीवनम् अर्थार्थम् । भूतरक्षणम् आपन्नभूतत्राणम् । धर्मार्थमर्थार्थं च । यद्यपि रक्षणं कुर्वन् शस्त्रेणाजीवनं लभते । तथापि विनाप्याजीवनम् आपन्नत्राणं कर्तव्यमिति रक्षणग्रहणेन दर्शयति । वैश्यस्येति । अध्ययनादयो धर्माः । कृषिपाशुपाल्ये वृत्त्यर्थे प्राधान्येन, योगविभागकरणात् । वणिज्या च वणिक्कर्म अन्वाचीयमाना । अल्पफलत्वात् । अतो वार्तेति नोक्तम् । शूद्रस्येति । द्विजादीनां ब्राह्मणक्षत्रियविशां शुश्रूषा परिचरणं धर्मार्थम् । वृत्तये च वार्ता । तथा कारुकर्म तक्षणादि । कुशीलवकर्म नृत्तगीतादि । एतद् यथोत्तरमुपचीयमानं वृत्त्यङ्गम् ॥

आश्रमानधिकृत्याह—गृहस्थस्येति । सर्वाश्रमाणां प्रभवत्वाद् उपकारित्वाच्च प्राग् गृहस्थग्रहणम् । गृहं भार्या यत्र तिष्ठतीति गृहस्थः, तस्य ब्राह्मणादेः स्वेन स्वेन कर्मणा पूर्वोक्तेन आजीवनं वृत्तिः । तुल्यैः अभिजनतस्तुल्यैः । तत्रापि असमानर्षिभिः असमानप्रवरैः अतुल्यगोत्रैरित्यर्थः । वैवाह्यं विवाहकर्म कन्यादानवरणम् । ऋतुगामित्वम् ऋतुकालेऽभिगमनशीलता, धर्मप्रजावृद्ध्यर्थम् । अन्यथा दोषः । यथोक्तम्—

"ऋतुमतीं तु यो भार्यां सन्निधौ नोपगच्छति ।
तस्याः पुरीषे षण्मासान् पितरस्तस्य शेरते ॥"

इति । अन्यत्र रत्यर्थम्, सर्वत्र वा प्रतिषिद्धवर्जमिति । देवेषु त्रयीचोदितेषु । पितृषु च यथास्वं विप्रादीनां सोमपा-हविर्भुग्-आज्यप-सुकालिषु । अतिथिषु तत्कालोपस्थितेषु । भृत्येषु दासकर्मकरादिषु । त्यागः कृताकृतद्रव्यविनियोजनम् । शेषभोजनं पश्चात्कालभोजनं देवपित्रतिथ्यर्थपाकावशेषभोजनं विघसाशित्वप्रति-षेधार्थम् ॥

T. 30. M. 8. ब्रह्मचारिण इति । ब्रह्म वेदः । तदध्ययनार्थं यद् व्रतं तदपि ब्रह्म, तच्चरति यः । "व्रते" (३. २. ८०.) इति णिनिः, तस्य । स्वाध्यायो यस्मिन्नेव वेदे व्रतं चरति स एवाध्येय इति स्वग्रहणम् । अग्निकार्यम् अभिषेकश्च स्नानं यथोक्तम् । 'व्रत भोजने' (?) इति ण्यन्तात् कर्मकर्तरि पचाद्यच् । एतद् वेदब्रह्मचारिण उपकुर्वाणस्य (आ) समावर्तनात् । आ मरणान्तात्तु नैष्ठिकस्यायं विशेषः । आचार्यकुले प्राणान्तिकी प्राणा एवान्तोऽवधिर्यस्या विद्यते सा । वृत्तिः शुश्रूषा । तदभावे गुरुपुत्रे द्वितीयः । सब्रह्मचारिणि वा समानचरणे तुल्यशाखाध्यायिनि वृत्तिरिति तृतीयः कल्पः । "चरणे ब्रह्मचारिणि" (६. ३. ८६) इति सभावः ॥

**वानप्रस्थस्येति** प्रतिष्ठन्तेऽस्मिन्निति प्रस्थो देश उच्यते । वनप्रस्थे वनोद्देशे भवो वानप्रस्थः । वैखानस इत्यपरनामा । तस्य अपत्ये संक्रमित-गार्हस्थ्यस्य पत्नीवत्त्वेऽपि **ब्रह्मचर्यम्** । **भूमौ** अनास्तरणायाम् । **शय्या** शयनम् । **जटानां** विन्यासीकृतकेशानाम् **अजिनस्य** चर्मणो धारणम् । अग्निहोत्रचरणं पत्नीयुक्तत्वात् । "वनं गच्छेत् सहैव वा" इति वचनात् । **अभिषेकः** । यथोक्तदेवतातिथिपूजा । **वन्यश्च** वनभवः कन्दमूलफलनीवारादिः । **आहारः** आह्रियते भक्ष्यत इति कृत्वा । न तु शास्त्रप्रतिषिद्धो मांसादिः ॥

**परिव्राजकस्येति** "वर्षासमयाद् अन्यत्र ग्रामे एकरात्रं नगरे पञ्चरात्रम्" इति वचनात् । परिव्रजतीति परिव्राजकः । भिक्षुरिति द्वितीयनामा । तस्य **यतेन्द्रियत्वम्** अलोलुपेन्द्रियता । **अनारम्भः** क्रियादीनाम् । **निष्किञ्चनत्वं** प्रव्रज्योपकरणव्यतिरिक्तानुपादानात् । बन्धुमित्रादिभिः यः **सङ्गः** तस्य त्यागः । **भैक्षं** भिक्षाणां समूहः । नैका भिक्षा, तत्रापि नैकस्मिन् ग्रामे नगरे वा स्यात्, किन्तु **अनेकत्र** । तत्राप्यरण्ये ग्रामादिसमीपे **वासः** न ग्रामादाविति । बाह्यं शौचं मृदादिभिः अमेध्यापनोदनार्थम् । आभ्यन्तरं मनःशौचम्, रागद्वेषादिप्रहाणात् ॥

वर्णाश्रमाणां धर्मानुक्त्वा सामान्यानाह—**सर्वेषाम्** इति । **अहिंसा** सत्त्वस्यापीडनम् । **सत्यं** यथार्थवाक् । **शौचं** बाह्याभ्यन्तरम् । परगुणाक्षमता असूया तदभावोऽनसूया । **आनृशंस्यम्** अक्रूरता । अनुकम्पेत्यर्थः । **क्षमा** च आक्रोशादितितिक्षा ॥

T. 31. **स्वधर्म** इति । स्वग्रहणं सामान्यनिरासार्थम् । यथायोगं कश्चित् **स्वर्गाय** कश्चिद् **आनन्त्याय** मोक्षाय । न विद्यते अन्तो अस्येत्यनन्तः, मोक्षः । अनन्त एव आनन्त्यम् । स्वर्गस्य अन्तवत्त्वात् । **तस्य** धर्मस्य, **अतिक्रमे** लङ्घने न केवलं फलाभावः, अपि तु **लोकः संकराद्** उच्छिद्येत । नरकं यायाद् विनश्येद् वा । संकरो द्विविधः—कर्मसंकरो वर्णसंकरश्च । तत्र पूर्वः शूद्रस्य द्विजकर्म, द्विजस्य आपत्कल्पवर्जं शूद्रकर्मेत्यादि । द्वितीयो ह्यन्तरालाः प्रतिलोमानुलोमाः ॥

यत एवं **तस्मात् स्वधर्मं भूतानां** मनुष्याणां **राजा न व्यभिचारयेत्** हेतुकर्तृत्वेन । **हि** यस्मात् **स्वधर्मं सन्दधानः** प्रतिपादयन्नित्यर्थः । **प्रेत्य** जन्मान्तरे । **इह च लोके नन्दति** मोदते । धर्मोपादानात् त्रयीधर्मव्यवस्था नैकफला ॥

इति विद्यासमुद्देशे त्रयीस्थापना ।

तृतीयोऽध्यायः ॥

# अथ चतुर्थोऽध्यायः

T.32. नीतेश्च स्थापनमाह—**कृषिरित्यादि** । कर्षणं कृषिः । "इक् कृष्यादिभ्यः" (वा. ३-३-१०८) इतीक् । तत्साहचर्यात् तच्छास्त्रमपि पराशरप्रोक्तम् । तत्र हि जलभूमिबीजपरिकर्मवापकालदोहदव्याधिचिकित्सा-पुष्पफलरसगन्धनिर्यासविपर्याससम्पत्तिविधानम् । पशून् पालयतीति पशुपालः । तस्य कर्म **पाशुपाल्यम्** । तत्साहचर्याद् गौतमशालिहोत्रादि-प्रणीतं शास्त्रमपि । **वणिज्या** वणिक्कर्म । "दूतवणिग्भ्यां च" (वा. ५-१-१२६) इति यप्रत्ययः । तदस्यामस्तीति "अर्शआदिभ्योऽच्" (५-२-१२०) इत्यच् । वणिज्या वणिग्विद्या विदेहराजर्षिप्रोक्ता । तत्र हि सर्वपण्यानां लक्षणं क्रयविक्रयज्ञानं च । केचित् कृषिपाशुपाल्ये इति समस्य पठन्ति । तत्र च प्रयोजनम् इतरेतरापेक्षत्वम् । वणिज्यायाश्च पृथक्करणं निरपेक्षत्वादित्याहुः । तदयुक्तम् । सर्वेषां परस्परार्थकरणस्य अप्रतिषिद्धत्वात् । तस्माद् असमासकरणं समस्तव्यस्तज्ञापनार्थम् । एतत् सर्वं **वार्ता** । लोकस्य वर्तनं वृत्तिः । सा अस्यामस्तीति "प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः" (५-२-१०१) इति णप्रत्ययः । वार्ता क्रिया, तत्साहचर्याद् विद्यापि । अयं स्वरूपभेदः, फलभेदमाह—**धान्येत्यादि** । तत्र कृषिविद्या पूर्वमध्यावरधान्यप्रदानेन । पशुपालकर्मविद्या पशुपालनेन । वणिग्विद्या हिरण्यरूप्यप्रदानेन । विष्टिप्रदानं तु सर्वासां साधारणम् । यस्मात् कृष्यादिप्रतिबद्धकर्मकरमनुष्या विष्टिः । **औपकारिकी** उपकाराय प्रभवति वार्ता लोकस्येत्यर्थात् । राजा तु तत्फलद्वारेण तया विशेषेण उपकरोतीत्याह—**तयेत्यादि** । वार्तया हेतुभूतया यौ **कोशदण्डौ** ताभ्यां करणभूताभ्याम् । **राजा स्वपक्षं परपक्षं च वशीकरोति** । तत्र स्वप्रकृतिमनुगुणां बिभर्ति कोशेन । विलोमान् दमयति दण्डेन बलेन । परपक्षमुपगृह्णात्यर्थेन जयति दण्डेनेति वशीकरोति, तस्मा-दसाधारणस्वरूपफलभेदाद् वार्ता तृतीया विद्या । * ..........................

च्छामो यद्यत्र विसंवाद इति । T. 33. M. 9. यदि विवेकज्ञानसङ्कटावगाह-नत्रासात् प्रणीयेत तदा दोषमाह **अप्रणीत** इति । **मात्स्यन्यायमुत्पादयति** उत्थापयति । तमेव न्यायं दर्शयति—**बलीयान् अबलं हि ग्रसते** बलीयसा अबलो भक्ष्यते । यथोक्तम्—

---

* इतः परं पत्रार्धपरिमिता ग्रन्थपङ्क्तयो मातृकायां लुप्ताः ।

अस्ति मत्स्यस्तिमिर्नाम तथा मत्स्यस्तिमिङ्गिलः ।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव! ॥

इति । दण्डधराभावे शासितुरभावे । तेनेति दण्डेन । गुप्तो रक्षितो राजा प्रभवति विनेतुम् । तेन वा व्यवस्थापितः प्रकर्षेण भवति ॥

चतुर्वर्णाश्रमो लोक इत्युपसंहारः शिष्यावबोधनार्थः । राज्ञा दण्डेन पालित इत्युपायप्रशंसा । स्वधर्मकर्माभिरत इति विद्याफलम् । वर्तते स्वेषु कर्मस्विति राजवृत्तफलम् ॥

इति विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च ।
द्वितीयं प्रकरणम् । चतुर्थश्चाध्यायः ॥

## अथ पञ्चमोऽध्यायः

T. 34. M. 10. वृद्धसंयोगं विना विद्या न भवतीति तदनन्तरं वृद्धसंयोग उच्यत इति प्रकरणक्रमः । तमेव दर्शयन्नाह तस्मादिति । तत्र प्रकरणापेक्षया विद्यावृद्धा इति गम्यते । तैः संयोगः शिष्याचार्यसंबन्धः । तत्र संबन्धोऽपि वक्तव्य इति न वाच्यम् । पूर्वप्रकरणापेक्षं हि तदुत्तरसूत्रम् । उत्तरसूत्र-प्रकरणानुरूपं च तदादिसूत्रम् । तयोः स्वप्रकरणे गुणीभूतयोः नापेक्षा । यथा वाक्यार्थावयवानां पदानां वाक्यान्तरावयवैर्नापेक्षा, वाक्यद्वयोरेवापेक्षा । कथम् अधिकरणावयवानां प्रकरणानां संबन्ध इति चेत्—प्रकरणान्येवैकार्थानि अधिकरणं त्वधिकरणमेवैषां न समुदायान्तरमित्यदोषः । आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः । तस्माद् दण्डमूलास्तिस्रो विद्या इति दण्डमाहात्म्यम् । दण्डोऽपि किंमूल इत्याह—विनयमूलः । सुप्रयुक्त इत्यर्थोक्तम् । कामादि-भिर्दुष्प्रयुक्तो भवति । एवंविधः प्राणभृतां मनुष्यादीनां योगक्षेमावहः ॥

स विनयो द्विविधः—कृतकः स्वाभाविकश्च । तत्र पूर्वो वक्ष्यमाण-विपाकजः ; स तु बीजमात्रं भवन्नपि न कार्यानुष्ठानयोग्यः । यथा जातिवि-शिष्टमपि सुवर्णं संस्कृतमेव भूषणाय । संस्कारोऽपि सुवर्णस्यैव न लोहस्येति दर्शयन्नाह—क्रियाहीत्यादि । क्रिया विद्योपदेशः । सा द्रव्यं वक्ष्यमाणगुणं विनयति नाद्रव्यमिति । अद्रव्यमपि विनयेद् यत्नेन द्रव्यन्तु सौकर्येणेत्यस्य विनियोग इत्यर्थः । अथवा, सहजविनयो द्रव्यं सहजदोषमद्रव्यं सहजगुणदोषो द्रव्याद्रव्यम् । तत्र क्रिया द्रव्यं विनयत्येव सौकर्यात् । अद्रव्यं नैव दुर्बुद्धेर-

कर्मण्यत्वात् सौकर्याभावात् प्रत्याख्यानाभावाच्च । द्रव्याद्रव्यं यत्नेन विनयति तस्याहार्यबुद्धित्वात् । कः पुनर्द्रव्यमित्याह—शुश्रूषेत्यादि । शुश्रूषा श्रोतुमिच्छा । तस्यां श्रवणम् आसेवा । तस्मिन् सति श्रुतानामर्थानामवधारणं ग्रहणम् । गृहीतानां धारणम् अविस्मरणम् । धारितानां विविधसाध्यसाधनस्वरूपज्ञानादिभिर्विवेकज्ञानं विज्ञानम् । विज्ञातानाम् अर्थप्राप्तस्योपादानम् ऊहः, यथा द्रव्याद्रव्यं यत्नसाध्यमिति । अनिष्टपरित्यागोऽपोहः, यथा अद्रव्यमिति । वस्तुस्वभावनिर्णयस्तत्त्वाभिनिवेशः, यथा धर्मार्थहेतवो विद्या एव नाविद्याः, विद्याश्च पृथक्पृथगसाधारणप्रयोजनत्वात् चतस्र एवेति । एतेषु सर्वेष्वभिनिविष्टबुद्धिं सततावस्थितबुद्धिं द्रव्यं विनयति । का सा क्रियेत्याह—विद्येति । विद्या आन्वीक्षिकीत्याद्या, कर्मविद्या च वक्ष्यमाण उपदिश्यमाना । नेतरमद्रव्यं विनयति ॥

विद्याग्रहणार्थं वृद्धसम्प्रयोगः । तद्ग्रहणं च विनयनियमाभ्यां विना न भवतीत्याह—विद्यानां त्विति । यथास्वमिति यो यस्यां विद्यायां विनयः प्रत्युत्थानपरिचर्यादिः । नियमो व्रतं दण्डमेखलादिधारणादि । स अचार्यप्रामाण्यात् स्यात् । यमाचार्या विद्यावृद्धा आहुः सोऽनुष्ठेय इति । अतस्तयोरत्र अनभिधानं विद्यानामानन्त्यात् । पूर्वाचार्यैस्तु उभयमपि स्वशास्त्रे विहितम् ॥

T.35. यस्तु दण्डस्य मूलं विनयः स विद्याप्रभावतः । अत एवेदानीं बाल्यावस्थातः प्रभृति राज्ञो वृद्धसंयोगं दर्शयति—वृत्तचौलकर्मेति । चूडाया इदं कर्म चौलम् । कर्म तद् वृत्तमस्येति । स तृतीयाद्वर्षाद् यथाशक्ति प्राक् । लिपिमक्षरचिह्नानि सर्वोपायहेतुत्वात् । ततः संख्यानं गणितं सर्वव्यवहाराङ्गम् । उपयुञ्जीत शिक्षेत । तस्मिन् काले अन्यशास्त्रस्य अनधिकारात् । वृत्तोपनयन इति । विद्याः स्वसमीपनयनमुपनयनम् (?) । तच्च क्षत्रियस्य राज्ञ एकादशे वर्षे, तद् वृत्तं कृतमस्येति । सः प्राक् त्रयीम् । अन्यथा व्रतकालातिपातः स्यात् । ततो यथेष्टम् आन्वीक्षिकीम् शिष्टेभ्य इति । विद्याभिजनदेशवृत्तशीलसम्पन्ने(न्नेभ्यः शि)क्षणप्रयोगकुशलेभ्यश्च । अन्यथा शास्त्रविद् अदृष्टकर्मा कर्मोपदेशे व्यामुह्येत । उपयुञ्जीतेति सर्वत्र योज्यम् ॥

ब्रह्मचर्यं च आ षोडशाद् वर्षात् । विद्याग्रहणार्थं धर्मार्थं (च) । अत इति षोडशाद् वर्षादूर्ध्वम् । गोदानं समावर्तनम् । दारकर्म च अस्य समावृत्तस्य

परिणयनं धर्मार्थं सुखार्थं च । विद्यानिमित्ता येषां पूजा ते **विद्यावृद्धाः** । तैश्च **नित्यं संयोगः स्यात्** । कृतदारकर्मणोऽपि विद्या विनयार्था । विद्याविनीतस्यापि विनयो वर्धते । इदं च कर्तव्यप्रयोजनासु कर्मविद्यासु ॥

**विनयं** ज्ञानक्रियावैचक्षण्यं **गच्छेत्** । **पश्चिममहर्भागं** सुखासीनो विनोदधर्मजिज्ञासार्थम् **इतिहासश्रवणे** विनयं गच्छेत् । कः पुनरितिहास इत्याह—**पुराणमिति** । सृष्ट्यादिज्ञानफलम् । तथा चोक्तम्—

सृष्टिप्रवृत्तिसंहारधर्ममोक्षप्रयोजनम् ।
ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम् ॥

इति । **इतिवृत्तं** नयापनयाभ्यां सम्पत्तिविपत्तिप्रदर्शनफलं रामायणभारतादि । **आख्यायिकोदाहरणं** वर्जनसेवनफलं तन्त्राख्यायिकादि । तत्र वर्जनफलं लोभोऽत्यन्तं न कार्य इति लोभस्य दोषोदाहरणम् "जम्बुको धनुषा हतः" इत्यादि । सेवनफलमपि—

प्रत्युत्पन्नेषु कार्येषु यस्य बुद्धिर्न हीयते ।
स निस्तरति दुर्गाणि जलमध्ये कपिर्यथा ॥

इत्यादि । **धर्मशास्त्रं** मानवादि । T.36. अर्थसंबन्धि यत्किञ्चिद् धातुवादादिकं तद**र्थशास्त्र**मिह गृह्यते । **शेष(म्)** इत्युभयशेषम् **अहर्भागम्** । **अपूर्वग्रहणं** विद्याग्रहणकाले अपरिसमाप्तानां ग्रहणम् । **अगृहीतानाम्** अशक्यग्रहणानाम् । **अभीक्ष्णं** पुनःपुनः **श्रवणं च कुर्यात्** ॥

M. 11. कस्मादित्याह—**श्रुताद्धीति** । हि यस्मात् श्रुतादुपायपूर्वं **प्रज्ञोपजायते** । **प्रज्ञया योगः** कर्मसूत्थानम्, उद्योग इत्यर्थः । **योगादात्मात्मसम्पत्** । अन्यथा ह्यविद्यमानकल्प एवायं स्यात्, इत्येतद् **विद्यासामर्थ्यम्** । वृद्धयोगजमित्यर्थः ॥

तदेव दर्शयन्नाह—**विद्याविनीत** इति । सहजविनययोगाद् विद्याग्रहणम् अतो **गृहीतात्म**त्वात् स्वयमनुष्ठित्युपदेशाच्च । ततश्च राजा दीप्यमानतेजसा अभिभवन् प्रजाविनययोगनिमित्तं भवति । अतः **प्रजाविनये रतः** । **अनन्याम्**

असपत्नाम्, पृथिवीं भुङ्क्ते । पालयित्वा फलमासेवते । इत्यनवने भवत्येव आत्मनेपदम् । भोगकाले च विविधत्यागार्थं सर्वेषां स्थावरजङ्गमानां हिते रतः । हितस्य आधाता इत्यर्थः ॥

इति वृद्धसंयोगस्तृतीयं प्रकरणम्

पञ्चमश्चाऽध्यायः ॥

## अथ षष्ठोऽध्यायः

T.37. विद्यावृद्धसंयोगात् अवाप्तविद्याविनयेन ज्ञाने सति इन्द्रियजयः शक्यत इति तदनन्तरं इन्द्रियजय उच्यतेऽध्यायद्वयेनेति प्रकरणक्रमः । तदाह— **विद्याविनयहेतुरिन्द्रियजय** इति । विद्याविनयो हेतुर्यस्य इन्द्रियजयस्य स कार्य इति संबन्धः । कथं कार्य इत्याह—**कामादीनां त्यागादिति** । कामादयो मानसा धर्मा बाह्येन्द्रियवृत्तिहेतवः । अतो मनोदोषाभावात् अश्रमेण कर्णादयो विजिता भवन्ति । दोष........................तत्र **कामो** नेच्छामात्रम्, अपि तु व्यसनहेतुर्यः स ग्राह्यः । **क्रोधो**ऽक्षमा, प्रत्ययोऽपि वाक्पारुष्यादिनिमित्तः । **लोभः** स्वपरद्रव्या(भि? ति)गर्धास्वरूपः । **मानो** नीतिसाध्येऽप्युन्नतमनस्कता । **मदो** विद्यासौन्दर्यादिजनितो दर्प इत्यर्थः । **हर्षो**ऽतिक्रीडनोन्म(ति? त्तिः) । तेषां व्यसनहेतूनां त्यागः, तस्मात् त्यागात् कार्य इत्यावश्यकार्थः । किंस्वरूप इन्द्रियजय इत्याह—**कर्णत्वगित्यादि** । श्रोत्रादीनामन्तःकरणाधिष्ठितानां यथास्वं शब्दादिविषयेषु **अविप्रतिपत्तिरिन्द्रियजयः** । तत्र अज्ञानाधिष्ठितानां विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः । यथाशास्त्रविहिताद् विपरीता वा गुरुपरिवादश्रवणं, परस्त्रीस्पर्शनं, स्त्रीगुह्यदर्शनम्, अभक्ष्यास्वादनम्, सुराघ्राणम् इत्येवंप्रकारदोषवती । अतोऽन्यथा तेष्वविप्रतिपत्तिः इन्द्रियजयः । एतत् प्रदर्शनमात्रम्, इदं तु कृत्स्नं लक्षणं **शास्त्रानुष्ठानं** वेति । शास्त्रे हि अस्मिन् सर्वेषाम् इन्द्रियाणां विषयेषु सर्वरूपा विप्रतिपत्तिः प्रतिषिद्धा । तत्र अनसूयाक्षमादिभिः मनइन्द्रियविप्रतिपत्तिः, अनृतपरद्रव्यादानादिप्रतिषेधात् कर्मेन्द्रियविप्रतिपत्तिः, मद्यपानादिप्रतिषेधाद् बुद्धीन्द्रियविप्रतिपत्तिः । तेन पूर्वस्माद्विशेष इत्ययमेव ज्यायानित्याह—**कृत्स्नं** हीति । यस्मात्तु न शास्त्रावयवोऽस्ति व्यापारशून्यः । न च व्यापारः कश्चिदेकादशेन्द्रियनिरपेक्षः । तस्मादिदमेव **शास्त्रं कृत्स्नमिन्द्रियजयः** । इन्द्रियजयहेतूनाम् अर्थानाम् अभिधानात् ॥

सम्प्रति विप्रतिपत्त्यविप्रतिपत्त्योर्हानोपादानार्थं दोषगुणावाह—**तद्विरुद्धवृत्तिरिति** शास्त्रविहितविरुद्धवृत्तिः। एवञ्च कृत्वा **अवश्येन्द्रियः** अजितेन्द्रियः। **चातुरन्तोऽपि** पृथिवीचतुरन्तभवः। चतुस्समुद्राधिपतिरिति यावत्। एवंविधोऽपि **राजा** प्रतीकारकालमसंभावयन् **विनश्यति**। विशेषेण नश्यति। अनेन निर्मूलतामाह। **यथा** इत्यादिना दृढीकरणार्थमितिवृत्ताख्यानम्। दण्डकानां सङ्घस्य मुख्यो **दाण्डक्यः,** भोज इत्यपरनामा। **कामाद् ब्राह्मणकन्यामभिमन्यमानः** अभिगच्छन् ननाश। स हि अत्यन्तानुच्छिन्नकामदोषः कदाचिन्मृगयामनुचरन् भार्गवकन्यां विरजोऽभिधानां रूपयौवनवतीं शून्याश्रमस्थां दृष्ट्वा जातरागः तां रथमारोप्य स्वपुरमाजगाम। भार्गवोऽपि समित्कुशमादाय वनादावृत्यागतः शून्यम् आश्रममालोक्य अभिध्यायन् यथावृत्तं ज्ञात्वा सञ्जातक्रोध एव शापमुत्ससर्ज। तच्छापात् सप्तभिरहोभिः पांसुवर्षेणाक्रान्तः सबन्धुराष्ट्रो विननाश। एवं चाद्यापि गीयते राष्ट्रदण्डकमिति। दण्डकमुख्यस्य भृगुकन्याभिमर्शनात् कृतविनाशदर्शनात्। एवं पांसुवर्षणाद् दण्डकारण्यमित्येव प्रसिद्धम् ॥

**करालश्च वैदेहः**। कामाद् ब्राह्मणकन्यामभिमन्यमान इत्यनुवर्तते। विदेहेषु भवो वैदेहः। करालनामा राजा योगेश्वरयात्रायां कौतुकाल्लोकसमाजं पश्यन् ब्रह्मविदः कस्यचित् पत्नीं रूपयौवनवतीं दृष्ट्वा कामपरवशः तामपहृत्य पुरमाजगाम। ब्राह्मणोऽपि रोषादेवं वदन् पुरमाजगाम। तत्पुरं कथं न दीर्यते यत्रैष दुरात्मा तिष्ठतीति। स च तद्वचनानन्तरं सह प्रकृतिभिः विदीर्णपृथिवीद्वारेण रसातलं प्रविशन्ननाश। तथा चोक्तम्—

ब्राह्मणीं संस्पृशन्नेव सगणो मिथिलेश्वरः।
त्यक्तः सघृणयैवोर्व्या विवेशाशु रसातलम् ॥

इति।

**कोपाज्जनमेजयो ब्राह्मणेषु विक्रान्त** इति। तथा चोक्तम्—

नृपतावश्वमेधेन दीक्षिते जनमेजये।
मध्ये किल समेतानां देवतानां हविर्भुजाम् ॥
(पत्न्य?वह्न्य)गारगतां पत्नीमश्वाङ्गस्पर्शकर्मणि।
ऊरुमूलेक्षणादिन्द्रो रम्भोरूं चकमे बलात् ॥
ऋत्विक्षु शङ्कमानोऽसौ क्रोधेर्ष्याकु(पि? लि)तो नृपः।
विचक्रामाथ वाग्भिश्च कशाभिश्चातिकर्कशम् ॥

ऋत्विजो ब्राह्मणान् शान्तान् यो दुष्टोऽस्मान् जिघांसति ।
स नश्यत्विति तैरुक्ते राज्ञो मूर्धा व्यशीर्यत ॥

इति ।

T.38. **तालजङ्घश्च भृगुषु** विक्रान्त इति । हैहयाधिपतिः तालजङ्घो नाम राजा प्रत्युत्पन्नार्थकृच्छ्रो भृग्वाश्रमे केनापि निक्षिप्तं सुवर्णभाण्डम् उपलभ्य बलाद् आदातुकामः 'कस्त्वमस्य ग्रहीता' इत्याधिक्षेपाद् उद्दीपितक्रोधो भृगुं दर्पाद् अशेषयितुकामः जातमात्रस्य और्वस्य कोपात् सगोत्रो ननाश । तथा च गीयते—

तत्कृतं तालजङ्घेन भृगून् रोषाज्जिघांसता ।
तं हत्वाद्यापि येनाग्निः समुद्रे (न विशीर्य)ति ॥

इति ।

**लोभादैलश्चेति** । ऐल इलाया अपत्यं पुरूरवाः शक्रदर्शनाय स्वर्गं गतो मूर्तिमतो धर्मार्थकामान् ढौकित्वा धर्ममेवेतरावनादृत्य प्रदक्षिणीचकार । ततोऽर्थकामौ क्रुद्धौ तमशपताम् । तत्र कामशापात् कथंचिदुपशान्तोर्वशीविरहोन्मादः, अर्थाभिशापादतिप्रवृद्धलोभः **चातुर्वर्ण्यं,** चतुर एव वर्णान्, **अत्याहारयमाणो**ऽतिशयेनार्थमापादयन् कथं नाम ममैकस्यासाधारणो धर्मः स्यादिति मन्यमानो अर्थापहाराद् यज्ञादिक्रियाविरोधोद्विग्नैः ब्राह्मणैरभिशप्तो ननाश ।

अविरोधेन धर्मार्थौ युक्त्या सेवेत पण्डितः ।
धर्मैकपक्षप्रवणो लोभादैलोऽनशत् पुरा ॥

इति ।

**सौवीरश्चाजबिन्दुरिति** । सुवीर(स्य) राज्ञोऽन्वये अजबिन्दुर्नाम राजा द्रव्यराशिमेकस्थमेव दिदृक्षमाणश्चतुरो वर्णानत्याहारयमाणोऽत्यक्तस्वत्वात् कर्शितापरक्ताभिः प्रजाभिः संहत्य एकलोष्टोपघातेन हन्यमानो ननाश । तथा चाहुः—

यथा हि नो द्रव्यराशिं सुवीराधिपतिश्चिरात् ।
तथाद्रियत लोष्टानां क्षणाद् (आशी?राशि) र्निहत्य तम् ॥

इति ।

**मानाद् रावण** इति । स समुद्रस्योत्तरे तीरे (रामे) स्थिते सति विभीषणादिभिरुक्तः सीता दीयतामिति मानादप्रयच्छन्ननाश ।

प्रत्याख्यातोऽपि वैदेह्या शापस्यानुस्मरन्नपि ।
मानान्महात्मने सीतां नैच्छद्दातुं निशाचरः ॥

इति ।

**दुर्योधनो राज्यांशं च**—पूर्णेऽप्यवधावप्रयच्छन्ननाश । तथा चोक्तम्—

पञ्च नस्तात दीयन्तां ग्रामा वा नगराणि वा ।
वसेयुः सहिता यत्र मा च नो भारता नशन् ॥

सोऽप्यस्मद्वञ्चनार्थमिति बुद्ध्वा अभिमानादाह—

यावदग्रेण तीक्ष्णायाः सूच्या विध्येत माधव ।
तावदप्यपि मया त्याज्यं न भूमेः पाण्डवान् प्रति ॥

इति ।

**मदाद्दम्भोद्भव** इति—दम्भोद्भवो नाम राजा वीर्यावलेपाद् भूतावमानी लोकाभिभवनशीलः कञ्चिद् योद्धुम् अनासादयन् विदह्यमानो नारदादुपलभ्याधिकप्रभावौ नरनारायणौ बदरिकाश्रमं जगाम । तत्र तावभिभवन् नरेण इषीकाभिश्छादितः सबलो ननाश ॥

**कार्तवीर्यश्च** कृतवीर्यपुत्रोऽर्जुननामा भूतावमानी कञ्चिदनासादयन् नारदादेव परशुराममभ्यधिकं श्रुत्वा जमदग्न्याश्रममुपगम्य वत्सग्रहणोपायेनाभिभवन् परशुरामेण परशुना छिन्नसहस्रबाहुर्ननाश ॥

M.12. **हर्षाद् वातापिरिति** । हर्षः क्रीडासुखम् । वातापिर्नाम असुरोऽतिक्रीडापरः मायया भ्रातरं कनीयांसमिल्वलनामानं छागीकृत्य हत्वा तन्मांसेन मुनीन् अतिथीन् भोजयित्वा विद्याम् उच्चार्य तमाजुहाव आगच्छेति । असावपि तेषां कुक्षिं निर्भिद्य निर्जगाम । कदाचिदागताय अगस्त्याय तथैवोपहृत्य आह्वयत् । जीर्णोऽसाविति मुनेरुपलभ्य तद्विदारणाय सूक्ष्मीभूय प्रविष्टः सोऽपि तमत्यासादयन् अनुजवज्जीर्णो ननाश । एवं च लोके तदत्याशितैः कुक्षिरभिमन्त्र्यते—

इल्वलो भक्षितो येन वातापिश्च महासुरः ।
स मे भुक्तं तथा पीतमगस्त्यो जरयिष्यति ॥

इति ।

**वृष्णिसङ्घश्च द्वैपायनमिति** । वृष्णिपुत्रा स्त्रीवेषधारिणा साम्बेन सह क्रीडितप्रसङ्गाद् द्वैपायनं दुर्वाससं क्षुधितमलक्षयित्वोपहसन्तः पप्रच्छुः— भगवन् किमियं साम्बवधूर्विजनयिष्यतीति । स तान् क्रोधाच्छशाप—

> वंशक्षयकरं घोरमायसं मुसलं महत् ।
> वासुदेवस्य दायादः साम्बो विजनयिष्यति ॥

इति । ते तं जातमायसं श्लक्ष्णं चूर्णयित्वा चिक्षिपुः । तदेरकावनमभूत् । कदाचिद् वृष्णयः समुद्रतीरे एरकापिण्डोपविष्टा आपानकमनुतिष्ठन्तः कलहात् परस्परमेरकापिण्डैर्घ्नन्तो विनष्टा इति ॥

सर्वत्रापीदमुदाहरणं दार्ढ्यार्थमुपसंहरन्नाह—**एते चेति** । **अन्ये चेति** ऐकान्तिकत्वं दर्शयति । **शत्रुषड्वर्गमिति** षण्णां कामादीनां वर्गः, स च शत्रुकल्पत्वाच्छत्रुरिति शत्रुषड्वर्गः तम् । **आश्रितास्तद्वशा** इत्यर्थः । ते चान्त(र? रा) बाह्यशत्रुभ्यो बलवन्त इति निश्चयः । येन **सबन्धुराष्ट्रा अपि विनेशुः** ॥

**शत्रुषड्वर्गमिति** । **उत्सृज्य** निर्बलीकृत्य । **जामदग्न्यो जितेन्द्रियः** । असत्यपि राजबीजत्वे जितेन्द्रियत्वादेव केवलात् । **अम्बरीषश्च नाभागो** नभागस्यापत्यम् । आश्रमस्थितावित्युत्साहरहितौ । **बुभुजाते** भुक्तवन्तौ । अत्र फलोपभोगादात्मनेपदम् । **चिरमि**त्यव्यवच्छिन्नाम् । **महीमिति** महाफलत्वमिति दर्शयति ॥

इतीन्द्रियजये अरिषड्वर्गत्यागः ।

षष्ठोऽध्यायः ॥

## अथ सप्तमोऽध्यायः

T. 39. शास्त्रानुष्ठानं वेति द्वितीयमिन्द्रियजयमधिकृत्याह । तत्र स्वशास्त्रोक्तानामर्थानां यथासारमुद्धृत्य शिष्यहितार्थमाह—**तस्मादिति** । यस्मादरिषड्वर्गमुत्सृज्य बुभुजाते चिरं महीं तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं **कुर्वीत** शास्त्रानुष्ठानं कुर्वीतेत्यर्थः । तदेव दर्शयन्नाह—**वृद्धसंयोगेन प्रज्ञामिति** । अनेन मन्त्रिपुरोहितोत्पत्तिमन्त्राधिकारिकान् शास्त्रावयवान् सूचयति । तेषु हि



24250
19.4.68

सर्वत्र वृद्धैः संयोगः तेन प्रज्ञामतिशयवतीं कुर्वीतेति वर्तते । तेन प्रश्नविवाद-संवादादिना यथा प्रज्ञा(नं ? न) तथा अध्ययनश्रवणाभ्याम् । यथोक्तम्—

साक्षात् पार्श्वस्थितान् पृच्छेल्लेखैस्त्वन्यांस्तथास्य तैः ।
प्रकाशो बहुभि(र्धृति ? र्धी)भिरु(क्ता ? ल्का)भिरिव व(र्घ्य ? र्ध)ते ॥

इति । चारेणेति । गूढपुरुषोत्पत्तिप्रणिधीनेव चक्षुः कुर्वीत । दूरदर्शी स्यादिति अन्यदेव चारात्मकं चक्षुः कुर्यादित्यर्थः । अलं च लौकिकं चक्षुरिति । उत्थानेनेति । राजप्रणिधिविहितेनोद्योगेनात्मनः प्रकृतीनां च योगक्षेमसाधनं कुर्वीत..........मात्रेण । तथा चोक्तम्—

राजा तूत्थीयते न स्वैः स्वयं कार्येष्वनुत्थितः ।
न ह्युद्योगोऽस्ति गात्राणामनुद्युक्तेऽन्तरात्मनि ॥

इति । प्रधानाचरणाच्चेतराचरणम् । तथा चोच्यते—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

इति । कार्यानुशासनेनेति । धर्मस्थीयोक्तेन व्यवहारानुष्ठानेन लोकस्य स्वधर्म-स्थापनं कुर्वीत न स्वेच्छया । (तुषिं ? तृषा) नापचरति । तत्रापि विनयमनुशासनं महान्तमल्पं वा विनयं विद्योपदेशेन धर्मार्थशास्त्रविहितेन कुर्वीत, न स्वेच्छया । लोकप्रियमर्थसंयोगेनेति । अर्थेन संयोगोऽस्मिन्निव्यर्थसंयोगो भृत्यभरणीयम् । तेन लोकप्रियं लोकसुखं कुर्वीत । न साम्ना सुचरितेन वा लोकः प्रीयते यथार्थेन संयुज्यमान इति । तथा चाहुः—

अर्थस्य पुरुषो दासः ।

इति । हितेन पथ्याहारविहारेण व्यसनत्यागेन च शरीरस्य राज्यस्य च वृत्तिं वर्तनं कुर्वीतेति । अयं प्रवृत्तिरूप इन्द्रियजयः ॥

एवमिति । एवंविधया शास्त्रोक्तया प्रवृत्त्या । वश्येन्द्रियः वशगतानीन्द्रियाणि यस्य । स कदाचित् प्रतिकारेषु प्रसज्यमानोऽपि परस्त्र्यादि वर्जयेत् । कामातिप्रसङ्गो हि वेश्यायामपि दोषवान् । परस्त्रियास्त्वधर्मानर्थद्वेषानुबन्धित्वा-(द् बलव) त्तरः । स्वद्रव्येऽपि लोभादतिनैपुणं दोषवत् । परद्रव्ये त्वधर्मानुबन्धी लोभो दूरतस्त्याज्यः । क्रोधः पुत्रदारशिष्यादावप्यतिशयेन नेष्यते । पर(भीः ? हिं)-

सा त्वधर्मानुबन्धित्वादुभयलोकविरुद्धा । अयमिन्द्रियजयो निवृत्तिरूपः । किञ्च **स्वप्नं** धर्मार्थारोग्यशास्त्रैरननुज्ञातकालमासेवमानो धर्मादीन् बाधते । **लौल्यं** जिह्वादीन्द्रियाणां चलत्वम् ..........परिभवाद्यङ्गम् । **अनृतं** मिथ्याभिधानम्, सर्वदोषकरम् अस्मान्नाभ्यधिकमन्यदस्ति । उद्धतानां रा......द्रावित्तकानां वेषमुद्धतवेषम् आर्यविरुद्धम् । **अनर्थ्यसंयोगम्** अनर्थ्यैर्नटनर्तकगायनादिभिः संयोगमनर्थहेतुम् । **अधर्मसंयुक्तं** महापातकसंयुक्तम् । **व्यवहारं** मायायोगविदां च व्यवहारम्, **अनर्थसंयुक्तं** दोषवत्त्वाद् वर्जयेदिति वर्तते ॥

स्वदारेष्वपि कामसेवायां विधिमाह—**धर्मार्थाविरोधेनेति** । ऋतावुपेयात् सर्वत्र वा प्रतिषेधवर्जमिति धर्माविरोधः । कामौपयिकवस्तुमात्रसम्पादनादर्थाविरोधः । यद्येवं धर्मार्थावेव सेव्यौ प्रधानत्वात्, न काम इत्यत्राह—**न निस्सुखःस्यादिति** । अवश्यमविरोधेन सेव्यम् । तस्य धर्मार्थयोः फलभूतत्वात् । पितृक्रियाङ्गत्वाद्धर्मार्थम्, अन्वयादिना चार्थार्थम् । तस्मादविरोधेन कालं विभज्य मात्रया सेवेत । तथा चाह गौतमः—

'न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्यात् । यथाशक्ति धर्मार्थकामेभ्यः' । (धर्मसू. अध्या. ९. सू. ४८)

इति । **समं वा त्रिवर्गं** सेवेत । नैकमतिशयेनेत्यर्थः । न केवलं **समम्**, **अन्योन्यानुबन्धम्** । यस्मिन् सेव्यमानेऽप्यनुबध्यते । तत्र धर्मोऽर्थेन कामेनोभयेन वेति अर्थकामानुबन्धः । अर्थो धर्मेण कामेनोभयेन वेति धर्मकामानुबन्धः । कामो धर्मेणार्थेनोभयेनवेति धर्मार्थानुबन्ध इति । एकस्यातिसेवायां दोषमाह—**एकोहीत्यादि** । धर्मादीनां मध्ये **एकोऽत्यन्तसेवितः आत्मानमितरौ च पीडयति** । तद्यथा—अतिदानेन धर्मोऽर्थं पीडयित्वा धर्मान्तरं च कामं च पीडयति । तपश्चात्यन्तं सेवि(तं ?)कामं बाधित्वा शरीरक्षयाद् धर्मार्थौ बाधते । अर्थोऽपि तादात्विकोऽस्ति य उपादीयमानः ऐलस्येव धर्मकामौ बाधित्वार्थमपि बाधते । कामोऽत्यासेव्यमानः शरीरक्षयादात्मानं पीडयति । असमुत्थानादर्थम् । अर्थाभावाद्धर्मम् । तस्मात् समं सेवेत ॥

तत्रापि शरीरान्तरोपात्तधर्ममूलत्वेऽप्यर्थकामयोः वर्तमानव्यापारापेक्षत्वादुपदेशमाह—**अर्थमूलाविति** । यस्माद् राज्ञो धर्मकामावर्थमूलौ, अर्थमुपजृम्भयतो द्वावप्यविरोधेन भवतः । तस्मादन्योन्यानुबन्धित्वेन अर्थस्य विशेषः

T. 40. M. 13. अतः सातत्येनार्थानुष्ठाने **मर्यादां स्थापयेद् आचार्यानमत्यान् वेति** । मर्यादामिव सीमामिवानतिक्रमणीयत्वात् । **य एनमिति** ये आचार्या अमात्या वा । एनं राजानम् **अपायस्थानेभ्यः** यत्रापायोऽवश्यं सन्निहितः तेभ्यः **वारयेयुः** । युष्माभिरहं प्रसङ्गेभ्यो निवारणीय इति । तत्र आचार्या धर्माविरोधाद् अमात्या अर्थाविरोधाद् वारयन्ति ॥

अदर्शनगोचरं च कथं वारयेयुरित्याह—**छायेति** । छाया त्रिपौरुष्यादि । **नालिका** 'सुवर्णमाषाश्चत्वारश्चतुरङ्गुलायामाः' (अधि. २. अध्या. २०.) इत्यादि तत्संबन्धेन । कालप्रविभागशंसिपटहशङ्खध्वनिः प्रतोदनार्थत्वात् **प्रतोद** इव तेन । **रहसि** अन्तःपुरे । **प्रमाद्यन्तं** सज्जमानम् । पशुमिवाभितुदेयुः इयमनुष्ठानान्तरवेला वर्तत इति ॥

तेषां स्थापने प्रयोजनान्तरमाह—**सहायसाध्यमिति** । राजत्वं राजभावः स यैरेव क्रियते, नात्मनैवास्य सिध्यति इति । यथा **चक्रं** भ्रमणयोग्यमपि कुलालदण्डानिरपेक्षं न प्रवर्तते । अथवा राजत्वं पृथिवीजयपालनव्यापारसमूहः सर्वप्रकृतिसहायेन राज्ञा शक्यो नैकान्तिकः । यथा अनेकावयवतत्साध्ये व्यापारे किमेकावयवं चक्रं प्रवर्तते । **कुर्वीत सचिवान्** सहायान् । **तस्माच्च** वर्तनप्रवर्तनात् । **तेषां च शृणुयान्मतम्** । (न) केवलं चेतयितारो ज्ञानस्याप्याधातार इति शास्त्रानुष्ठानम् ॥

इतीन्द्रियजयश्चतुर्थं प्रकरणम् ।

सप्तमश्चाध्यायः ॥

## अथ अष्टमोऽध्यायः

T. 41. कुर्वीत सचिवानित्युक्तम् । कीदृशानिति इन्द्रियजयानन्तरममात्योत्पत्तिरुच्यते । ते च द्विधा—कर्मामात्या बुद्ध्यमात्याश्च । तत्र पूर्वानधिकृत्याह—**सहाध्यायिन** इत्यादि । तेन सह ये गुरुकुले सातत्येनाधीतवन्तः तान् सहाध्यायिनः **कुर्वीत अमात्यानिति** । अमाशब्दोऽव्ययं सहार्थे, कार्यानुष्ठाने राज्ञा सह भवन्तीति । अमेहक्कतसित्रेभ्यस्त्यप् (वा. ४. ३. १०४) **दृष्टशौचसामर्थ्यानिति** । सहसंवासाद् दृष्टशौचान् ज्ञातोपधाशुद्धान् ज्ञातोपधाकर्मणा परीक्ष्य निर्दोषत्वेन स्निग्धत्वेन च ज्ञातान्, ज्ञातकर्मसामर्थ्यांश्च । तत्र शौचान्न तम् अभिसन्दधति । सामर्थ्याद् यथादिष्टं साधयन्ति । **भारद्वाजा** इति भरद्वाजस्यापत्यम् । यस्मात्ते राज्ञो **विश्वसनीया भवन्ति** ॥

**नेति विशालाक्ष** इति । विशालाक्षो महेश्वरः । भारद्वाजस्यार्वाक्कालभावित्वेनापि तन्मतमीश्वरमतेन विरुध्यत इति शास्त्रकारस्तद्व्यपदेशेन प्रतिषेधमाह--नेतीति । किंतर्हि **सहक्रीडितत्वादिति** । सहाध्यायिनां सहक्रीडितत्वमवश्यम् । अतश्च पूर्वप्रणयात् परिभवस्तेभ्योऽवश्यंभावी । आज्ञाफलं च राजत्वम् । **येऽस्य गुह्यसधर्माण** इति । समानो धर्मो येषामिति ते सधर्माणः । (गुह्ये) गूहनीये निन्दिते हिंसादौ कर्मणि सहकारितया येऽस्य राज्ञः समानधर्माणः तान् **कुर्वीत समानशीलव्यसनत्वादिति** । सहकारित्वात् समानशीलाः गुह्यकर्मत्वाच्च समानव्यसनाः । तच्छीला विश्वास्याः । पूर्ववद्विशेषो यदस्मन्मर्मज्ञोऽयमिति तदयं नापराध्यति न परिभवति । एवं च कृत्वा शौचे कार्यनिष्ठायां च यतन्त इति ॥

अन्यस्त्वाह--नेति । नैतावदेव सहाध्यायिमात्रं लक्षणम् । किन्तु परिभवप्रतिषेधार्थं गुह्यकर्मत्वम् अपरमिति । यस्मिन् व्याख्याने उत्तरत्रापि दोषप्रतिविधानाय शेषत्वेन लक्षणान्तरं योज्यम् ॥

**साधारण एष दोष** इति । समानोऽयं दोषः । **पाराशरा** इति पराशरशिष्याः समानदोषं दर्शयन्त आहुः—**तेषामपीति** । यथा ते नापराध्यन्ति तथा तेषामप्ययं **मर्मज्ञत्वभयात् कृताकृतानि** किञ्चित्कृतानि किञ्चिदकृतानि असम्यक्कृतानीत्यर्थः । **अनुवर्तेत** उपेक्षेतेत्यर्थः ॥

T. 42. लोकेऽप्येतदिति श्लोकेनाह--**यावद्भ्य** इति । **गुह्यमाचष्टे** कथयति, किमु यः समक्षं करोति । **जनेभ्य** इति, किमुतामात्येभ्यः । **पुरुषाधिपः**, किमुत विजिगीषुः । **अवशः** सन् **तेन कर्मणा** गुह्यकर्मकथनेन । **तावतां वश्यो भवति** । मा भूद्रहस्यभेद इति । M. 14. तस्माद् **य एनं** राजानम् **आपत्सु प्राणबाधयुक्तासु** क्लेशेन विनाशेन वा युक्तासु । **अनुगृह्णीयुः तानमात्यान् कुर्वीत दृष्टानुरागत्वात्** ॥

**नेति पैशुनः** । पिशुनो नामाचार्यः कोऽपि । नारद इति केचित् । **भक्तिरेषा न बुद्धिगुण** इति । अपद्यनुग्रहे भक्तिमात्रं न बुद्धिकौशलम् । स्त्रियोऽपि भर्तर्यनुरागवत्यः पत्या भरणीया भवन्ति । बुद्ध्या चैषां सर्वार्थया प्रयोजनम् । तस्माद् ये **कर्मसु** व्यापारेषु । **सङ्ख्यातार्थेषु** परिच्छिन्नफलेषु परिच्छिन्नसाधनेषु वा । **नियुक्ता यथादिष्टं** यथा आदिष्टम् एवमीदगीदगिति । **सविशेषम्** अधिकं शोभनं वा **कुर्युः** कर्मप्रावीण्यात् । **तानमात्यान् कुर्वीत, दृष्टगुणत्वात्** ॥

नेति कौणपदन्तः भीष्मः । पूतिदन्तस्य शन्तनोरयं पुत्र इति । दाक्ष्यादन्यैरमात्यगुणैरयुक्ताः । पूर्वगुणसमुच्चयेऽप्यभिजनशौर्यादिभिरयुक्ता ह्येते । पितृपैतामहानिति पितुः पैतामहान् । अमात्यान् कुर्वीत दृष्टापदानत्वादिति । अन्वयानुवृत्तेर्ज्ञातविशुद्धकर्मत्वात् । ते ह्येनमपचरन्तम् । स्वदोषादमार्गे प्रवर्तमानमपि । न त्यजन्ति किन्त्वनुवर्तन्त एव । अमानुषेषु अप्रेक्षापूर्वकारिष्वप्ययं न्यायो दृश्यत इत्याह--गावो हीति । अनपेक्षितपरस्परोपकाराः सजातीयत्वेऽपि असगन्धम् अपरिचितम् । गोगणमतिक्रम्य सगन्धेष्वेव तुल्यपरिचयेष्वेव अवतिष्ठन्ते ॥

T. 43. नेति वातव्याधिः उद्धवो नाम । ते ह्येवंगुणत्वेऽपि निर्भयत्वात् सर्वं चेष्टितम् अपहृत्य स्वामिवत् प्रचरन्ति वयमेव स्वामिन इति । तस्मान्नीतिविदो ज्ञातपूर्वकत्वादिसर्वगुणान् नवान् यथोक्तदोषाभावान् अमात्यान् कुर्वीत । तदेव दर्शयन्नाह--नवास्त्विति । ते हि यमस्थाने यमप्रसङ्गे । प्रीतिद्वेषानपेक्षत्वात् । दण्डयितारं मन्यमाना नापराध्यन्तीति ॥

नेति बाहुदन्तीपुत्रः । बाहुदन्तीपुत्र इन्द्रः । अन्योऽपि शास्त्रविददृष्टकर्मा नवो वैद्यादिः । कर्मसु विषादं गच्छेद् व्यामुह्येत । यथोक्तम्—

यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम् ॥

इति । शास्त्रं चेदं विशेषेण कर्मप्रदर्शनार्थं कर्मण्याभ्यासगम्यत्वात् । तेन दृष्टकर्मेत्यर्थादापन्नम् । तस्माद् अभिजनादियुक्तान् अमात्यान् कुर्वीत ॥

सर्वमुपपन्नं युक्तम् । यत आभिजात्यादिषु प्रधानगुणेषु सत्सु परिभवादयो दोषा नावतरन्त्येव । अतो विश्वासः, वश्यत्वम् , आपत्स्वनुग्राहित्वम् , दाक्ष्यम् , अपरित्यागित्वम् , भयम् , कर्मकौशलं चेत्येते प्रधानगुणा अभिजनान्वयित्वाद् अवश्यंभाविनः । तस्माद् अभिजातस्य अव्यभिचारित्वात् , प्राज्ञस्य बुद्धिसम्पन्नत्वात् , शुचेरवधारितशुद्धत्वात् , शूरस्य आपदि प्रतीकारसमर्थत्वात् , अनुरक्तस्य स्वाम्यर्थकारित्वात् किमसाध्यमस्तीति सर्वमुपपन्नम् । अन्यच्च कार्यसामर्थ्याद्धि कर्मसामर्थ्यादेव पुरुषसामर्थ्यं पुरुषाणां शक्तिः कल्प्यते । लघुनि समे महति वा कर्मणि तथाविधशक्तिः पुरुषो नियुज्यते ॥

T. 43. ततः किमित्याह—विभज्येति । अमात्याशून्यं विभवम् अमात्यानां शक्तिसम्पदं यथोक्तं विभज्य विभागेनावस्थाप्य । देशकालौ च कर्म च विभज्य । न हि सर्वज्ञः सर्वदेशकुशलः सर्वकालयोग्यः सर्वकर्मकुशलो वा कश्चिदेव क्वचित् कदचित् किञ्चित् कर्तुं समर्थ इति सर्व एवैते यथोक्तगुणा अमात्याः कर्मसचिवाः कार्याः स्युर्न तु मन्त्रिणः । यथोक्तगुणैरपर्याप्तत्वात् । अमात्यसामान्यप्रसङ्गेऽपि विशेषेण व्युदासः क्रियत इति ॥

अमात्योत्पत्तिः पञ्चमं प्रकरणम् ।

अष्टमश्चाध्यायः ॥

## अथ नवमोऽध्यायः

T. 45. M. 15. पूर्वोक्तगुणा यदि न मन्त्रिणः तर्हि ते कीदृशाः, पुरोहिताश्च कीदृशाः स्युरिति मन्त्रिपुरोहितोत्पत्तिरुच्यत इति प्रकरणक्रमः । जानपद इत्यादि । जनपदे भवः न अटव्यादिभवः । आर्यदेशभवः, स्वजनपदे वा भवः । स हि सदा तत्परिपालनशीलो भवति । अभिजातः अभिजनवान् । ब्राह्मणोऽन्यो वा कुलपुत्रत्वान्न विकर्मणि प्रवर्तते न प्रवर्तयति च । तथा चाह—

एवमर्थं कुलीनानां नृपाः कुर्वन्ति सङ्ग्रहम् ।
आदिमध्यावसानेषु यतो यान्ति न विक्रियाम् ॥

इति । स्ववग्रहः शोभनमवग्रहणं यस्य । स हि प्रमाद्यन्तं राजानं मृदुना क्रमण शोभनमवगृह्णाति । शोभनो वावग्रहो स्ववग्रहः स्नेहयुक्तं मित्रम् अवगृह्यतेऽनेनेति कृत्वा । स हि कल्याणमित्रयुक्तत्वान्नोत्पथं प्रतिपद्यते । कृतशिल्पः ज्ञातानि इष्वस्त्रादीनि शिल्पानि येन स दण्डनयनयोग्यो भवति । चक्षुष्मान् प्रमाणत्रयविशुद्धदर्शन इत्यर्थः, नोत्पथं प्रतिपद्यते, न प्रतिपादयति च । प्राज्ञः स्वाभाविकी शास्त्रसमुत्था च प्रज्ञा विद्यते यस्य स परैर्नाभिसन्धीयते । अभिजनप्रज्ञादीनां प्रागुक्तत्वात् पुनरिह ग्रहणं प्रकर्षार्थम् । पादार्धगुणहानौ चापरित्यागार्थम् । धारयिष्णुः अविस्मरणशीलः, स हि कार्यं न हापयति । दक्षः अनलसः कर्मस्वविश्रान्तः, उत्साहगुणेऽन्तर्भावेऽपि पुनर्ग्रहणं दाक्ष्यमपरित्याज्यमिति दर्शनार्थम । वाग्ग्मी अर्थयुक्तवाक्, शोभना वाग् यस्य । स हि

परान् रञ्जयन् आदेयवचनो भवति, यस्तु अनर्थकं बहु भाषते स वाचाल एव । प्रगल्भः वचनानुष्ठानयोः परिषदि असाध्वसः । प्रतिपत्तिमान् भये स्खलितेऽपि आशु प्रतिविधाता, वाग्मितादयश्चैते विशेषेणं दूतौपयिकाः । उत्साह-प्रभावयुक्त इति । "शौर्यममर्षः शीघ्रता दाक्ष्यं चोत्साहगुणाः" (अधि. ६. अध्या. १) इति वक्ष्यति। ....तत्र शौर्याद्युत्साहगुणयुक्तोऽपि कश्चित् निष्प्रतापः प्रागुत्साहाद् अभिभूयते । कश्चित् प्रतापवत्त्वेऽपि अकृतोत्साहः पश्चाद् अभिभूयते । उभयगुणस्तु सदा अप्रधृष्यः, अतश्च सहनिर्देशः । क्लेशसहः शीतोष्णवर्षासहत्वात् लाभविघ्नमासादयति । शुचिः धर्मादिविशुद्धचित्तत्वाद-हिंसकः, मैत्रः मित्रेषु कुशलः, मित्रार्जनकुशल इत्यर्थः । स हि पक्षवृद्धि-माप्नोति । दृढभक्तिः चिरस्नेहः, कृच्छ्रेऽप्यपरित्यागी । शीलादियुक्त इति । तत्र शीलं लोकप्रसिद्धया अपरपरिवादादिकम् तद्धि लोकरञ्जकम् । बलं प्राणः सर्वकर्माङ्गम् । पथ्यम् आरोग्यम् । सत्त्वं व्यसनेऽभ्युदये च यदविकारित्वम् । स्तम्भचापलहीन इति । स्तम्भो मदजनितो विकारः, निर्मदत्वाद् अभिगमनीयः । अचपलः विमृश्यकारी । संप्रियः अननुपकुर्वन्नपि सुभगाकाररुचिरः सुभगचरितश्च परान् सुखयति । वैराणामकर्ता विरोधानां प्रतिकर्ता न प्रकृतीरपरञ्जयति । अमात्यसंपदिति एतत् सर्वमभिधानं यतो निमित्तात् प्रवर्तते तन्निमित्तममात्यसंपदित्यर्थः । अमात्यशब्देन अत्र मन्त्रिणो बुद्धिसचिवस्याभिधानं द्रष्टव्यम् । अत इति गुणविंशतिकात् । पादार्धगुणहीनौ मध्यमावरौ ज्ञेयौ, सर्वगुणस्य उत्तमत्वम् अर्थप्राप्तम् ॥

ननु च गुणानां पादेन अर्धेन च हीनत्वाद् गुणपादार्धहीनाविति प्राप्नोति, अस्मिन् पादार्धगुण इत्यत्र पादमर्धं वा गुणा एव, अतः सामानाधि-करण्यम्, पादेन अर्धेन च गुणैर्हीनौ पादार्धगुणहीनाविति । पादार्धगुणौ च तौ हीनौ च सर्वगुणाद् इत्यस्मिन् व्याख्याने पादगुणस्य मध्यमत्वं प्राप्नोति । यथासङ्ख्यादिति पूर्वमेव व्याख्यातम् । अत्र पञ्चविंशतेः किञ्चिद् वैषम्येऽपि प्रायोवृत्त्या चतुर्भागोऽर्धभागश्च । अथवा पूर्वोक्तान् सर्वसाधारणान् अभिजनादीं-स्त्यक्त्वा विंशतेर्गुणानां सुकरो विभागः । तत्र पञ्चदशगुणयुक्तः पादहीनः । दशभिर्गुणैर्युक्तोऽर्धहीनः । अभिजनादयस्तु पञ्च साधारणा इति । ते च गुणाः कथमस्य स्युरितिपरीक्षायामाह—तेषामिति । तेषां गुणानां मध्ये पूर्वांस्त्रीन् गुणान् जानपदादीन् आप्यत इति । स्वजन आप्यते प्राप्यते संबध्यत इत्याप्याः । ते हि विशेषेण जानन्तीति तत एव परीक्षेत । आगमयेद् अयमीदृश इति ।

समानविद्येभ्य इति । यो यत्समानविद्यः स तं विशेषेण जानातीति । शिल्पं शास्त्रमेव चक्षुष्मत्तां प्रज्ञां च गुणद्वयं परीक्षेत आगमयेत् । कर्मारम्भेष्विति । कर्मणां दुर्गादीनाम् आरम्भेषु आरम्भविकल्पेषु । प्रज्ञां धारयिष्णुताम् इदं कर्तव्यमित्यनुस्मरणम् । दाक्ष्यं मनसः सत्त्वम् अश्रान्तत्वं परीक्षेत अनुमिनुयात् । T. 46. कथायोगेष्विति कथाप्रयोगेषु वाग्मित्वं प्रागल्भ्यम् । प्रतिभैव प्रतिभानं तद्वतो भावः प्रतिभानवत्त्वं प्रतिपत्तिमत्त्वमित्यर्थः । अनुभवादेव परीक्षेत न तर्कागमाभ्याम् । आपद्युत्साहप्रभावाविति । यो यस्यामापदि न विषीदति न मन्दप्रभावः क्लेशांश्च सहते सोऽन्यदापि कर्मण्य इति परीक्षेत अनुमिनुयात् । संव्यवहारादिति । लोकेन सह पौनःपुन्येन सम्यग् व्यवहृतिः तस्माच्छौचादीन् परीक्षेत । यथा नार्थशीलो न द्वेष्टि दृढस्नेहत्वादस्मान् कार्येष्वायस्य तथा अस्यैते गुणा नित्या इति तर्कयेदित्यर्थः । सहवासिभ्य इति । सह वासो येषां तेभ्य इति । शीलबलारोग्यसत्त्वयोगम् अस्तम्भम् अचापलं च परीक्षेतागमयेत् । प्रत्यक्षत इति स्वानुभावत एवेति । सम्प्रियत्वम् अवैरित्वं च परीक्षेत ॥

ननु जनपदशिल्पशीलादीन् आगमतः, प्रज्ञोत्साहशौचादीन् अनुमानेन च, वादित्वसंप्रियतादीन् प्रत्यक्षतः परीक्षेतेति कथं प्रमाणत्रयोपदेश इति चेत् । यस्मात् प्रत्यक्षपरोक्षानुमेया राजवृत्तिरिति । सा राजवृत्तिः प्रत्यक्षानुमानादि नातिक्रामति । मन्त्रिपुरोहितसखः अमात्यान् शोधयेदित्यादि प्रत्यक्षा, तपस्विनां तु कार्याणि धर्मस्थीयैरिति परोक्षा, यश्चैषां यथोद्दिष्टमर्थं सविशेषं वा कुर्यात् सोऽन्यदापीत्यनुमेया । तत्रेति प्रत्यक्षादिषु । स्वयं दृष्टम् आत्मीयैरक्षैर्विषयीकृतं प्रत्यक्षम् । ननु च विषयाकारप्राधान्येन तद्वस्तु । सत्यम्, एवं विज्ञानपरिच्छेद्यत्वाद् वस्त्वपि प्रत्यक्षम् । सर्वत्र च वस्तुप्रधानो निर्देशः प्रत्यक्षाद्याभासनिरासार्थः । परोपदिष्टमिति परैरविसंवादकैरुपदिष्टं वचनेन संज्ञया वा । परोक्षं परप्रत्यक्षम् आप्तोपदेश इत्यर्थः । वक्ष्यति च—"त्रयाणामेकवाक्यत्वे सम्प्रत्ययः" (अधि. १. अध्या. १२.) इति । कर्मस्विति दुर्गादिकेषु कृतेषु कर्तव्येषु वा कृतेन उपलब्धेन अकृतस्यावेक्षणमालोचनमनुमेयं करिष्यत्ययमिदं कर्म शक्तिमत्त्वाद् यथेदं कृतवानिमि । यद्येवमकृतावेक्षणमनुमानं किमुच्यतेऽनुमेयमिति । नैष दोषः । वाक्यैकदेशव्याहारात् । अकृतावेक्षणं यत्र तदनुमेयमिति वस्तूपादाने प्रयोजनमव्यभिचारिणि नियमार्थम् । यौगपद्यात्तु कर्मणामिति । अनेकं कर्म, अनेकस्थमनेकदेशस्थं न स्वयं युगपदनुष्ठातुं शक्यते ।

यत्त्वेकदेशस्थम् ऊर्णावर्मकर्मेत्यादि तद्युगपच्छक्येत क्रमेण चानेकदेशस्थमपि यथा—पूर्वमहर्भागं हस्त्यादिषु विनीयेत पश्चिममितिहासश्रवण इति। तत्र युगपदनेकदेशस्थं च हेमन्ते स्वदेशे दुर्गकर्म परदेशे यात्रा स्वबलप्रायस्येति। इत्येवंविधस्य स्वयंकरणे देशकालात्ययो मा भूदिति परोक्षममात्यैरिति। प्रकरणान्मन्त्रिभिः कर्म कारयेत्। इत्यमात्यकर्मेति। एवंजातीयकममात्यकर्म, स्वयमनुष्ठानायोग्यत्वात्॥

यथाऽमात्येभ्योऽधिका मन्त्रिणस्तथा मन्त्रिभ्यः पुरोहितोऽधिक इति गुणान्तराधिक्यं दर्शयन्नाह—पुरोहितमित्यादि। पुरो धीयते नियुज्यते दृष्टादृष्टेष्विति पुरोहितः। "दधातेर्हिः" (७.४-४२)। कीदृशं कुर्वीतेत्याह—उदितोदितकुलशीलमिति। चतुर्विधाः पुरुषाः, येषाम् आ चतुर्थाद् आ सप्तमाद्वा वृत्ताभिजनसम्पन्नाः पूर्वे नापरे ते उदितास्तमिताः। विपर्यये त्वस्तमितोदिताः। येषां न पूर्वे नापरे तेऽस्तमितास्तमिताः। येषां पूर्वे चापरे च वृत्ताभिजनसम्पन्नास्ते उदितोदितकुलशीला इति। तमेवंविधम्। साङ्गे प्रसङ्गे षडङ्गवेद इति प्रकरणादथर्वणे। दैवे निमित्ते दैवान्तरिक्षभौमशकुनादौ। दण्डनीत्याम्। T. 47. चाभिविनीतम् आभिमुख्येन शिक्षितम्। दैवीनाम् अग्न्युदकादीनाम्। मानुषीणां च दूष्यादिसंयुक्तानाम् (आपदाम्) यथाक्रमम् अथर्वभिरथर्वविहितैः प्रयोगैः, उपायैश्च सामादिभिः। M. 16. प्रतिकर्तारं प्रतिविधातारं कुर्वीत। स चाननुवर्तितो नाकार्यकारीत्याह—शिष्य इव पूजया। पितरमिव स्निह्यन्तम् पुत्र इवानुकूल्येन। स्वामिनो योगक्षेमसाधनपरं भृत्य इवानुजीविवृत्तेन अनुवर्तेत। इवशब्दः षड्भिरेव संबन्धनीयः॥

मन्त्रिपुरोहितयोरन्योन्यापेक्षितां दर्शयन्नाह—ब्राह्मणेनेति। ब्राह्मणेन पुरोहितेन। एधितं क्षत्रमिति जातिकर्मोपलक्षणम्। मन्त्रिण इति 'मन्त्रिणो यो(ग ?)मन्त्रः मन्त्राधिकारोत्पन्नः, तेन अभिमन्त्रितम् आभिमुख्येनोत्पादितनिश्चयम्। जयत्यजितमत्यन्तम्। ननु च लाभत्रैविध्ये नवस्य अजितत्वं न पित्र्यभूतपूर्वयोरिति तयोः परिपालनलक्षणो जयस्त्यक्तो भवति। नायं दोषः। नैवमुच्यते यदजितं तदेव जीयत इति। किन्तु जयत्यन्यदप्यजितमिति। अथवा (न) क्षत्रं तत्र कदाचिद्विपक्षेण जीयते जयति च, किं तर्ह्यजितमेवेति। यथाहुः—

विजयन्तेऽथ जीयन्ते प्रायेणेह जिगीषवः ।
कौरव्यस्तु जयत्येव कैश्चिदप्यपराजितः ॥

इति । शास्त्रमनुगच्छतीति **शास्त्रानुगम्** अथर्ववेदण्डनीत्यनुगामि । **अशस्त्रितम्** । शस्त्रं करोत्यभ्यस्यतीति शस्त्रितम् । अतथाभूतमशस्त्रितम् । अयुध्यमानमभिमन्त्रितयुद्धेन जयति । जयति निराबाधमित्यर्थः ॥

इति मन्त्रिपुरोहितोत्पत्तिः षष्ठं प्रकरणम्
नवमश्चाध्यायः ॥

## अथ दशमोऽध्यायः

एवं मन्त्रिपुरोहितावुत्पाद्य तयोः सुखेन विशिष्टविनियोगार्थम् उपधाभिः शौचाशौच(ज्ञान)ममात्यानामुच्यते । भावपरीक्षार्थमुपधीयन्ते युज्यन्ते स्फटिकं रक्तद्रव्यरागोपधानैरिव आभिरित्युपधाः, धर्माद्यालम्बना उपजापक्रियाः । ताभिरमात्यानां शौचाशौच(ज्ञान)मिति । **मन्त्रिपुरोहितसख** इति । मन्त्रिपुरोहितयोः सखेति षष्ठीसमासेन आत्मनोऽपि तयोराधिक्यमाह । अन्यथा तौ सखायावस्येति मन्त्रिपुरोहितसखा इति स्यात् । "राजाहस्सखिभ्यष्टच्" (५-४-९१) इति तत्पुरुषसमासान्तस्य विहितत्वात् । अत एव तद्व्यतिरिक्तामात्यशुद्धयर्थमिदं प्रकरणम् ॥

तौ च पित्र्यौ भूतपूर्वौ वा नवावपि सहोत्थायिनावात्मवदेव ज्ञातशौचसामर्थ्यौ । तत्रैतत्स्याद् अन्येऽप्यस्य पित्र्यभूतपूर्वाः सहोत्थायिनो वा स्युः किं परीक्षयेति । न न सन्ति, न च सर्वे परीक्ष्या इति ब्रूमः । किन्तु सत्स्वपि पूर्वेषु ये नवाश्रिताः ये न विज्ञातशौचाः, ते विनियोगविशेषार्थं परीक्ष्यन्ते । अत्र च सहायातिशयख्यापनार्थं तयोरुपादानम् । अन्यथा मन्त्रिपुरोहितसेनापतिसख इति वक्तव्यं स्यात्, सेनापतेरप्युपधाङ्गत्वात् । अत्र चोपधाङ्गत्वात् प्राङ् मन्त्रिणो निर्देश्याः, तेष्वसत्सु कैरुपदध्यादिति । नायं दोषः । न वचनक्रमापेक्षया अनुष्ठानप्रतिपत्तिः, किन्तु सामर्थ्यापेक्षयैव । न हि 'भुङ्क्ष्व पच्यताम्' इत्युक्ते पच्यतामित्यनुक्त्वा कथं भुङ्क्ष्वेत्युक्तमिति चोद्यं भवति । तथाऽप्ययमाचार्यः प्राधान्यादमात्योत्पत्तिं तत्सङ्गाच्च तत्परीक्षां प्रागाह । **सामान्येष्वधिकरणेषु** धर्मार्थव्यवहारस्थानेषु प्राक्छौचाशौचज्ञानादविभक्तयथार्हकर्तृषु । अथवा सामान्येषु लघुषु कुप्याद्ध्यक्षादिषु कर्मसु यत्र स्तोकमति-

पत्यते । **अमात्यान् स्थापयित्वा** विनियोज्य । **उपधाभिः शोधयेत्** परीक्षेत, पुरोहितेन सेनापतिना स्वयं च महिषीव्यपदेशेन ॥

तत्र **पुरोहितमिति** । अयाज्यस्य अयजनार्हस्य, **याजने**ऽध्यापने च । अमुं शूद्रापुत्रं याजय अध्यापयेति **नियुक्तम्** । तेन सह कृतसंवित्कत्वाद् **अमृष्यमाणम्** अक्षममाणं कथमयमेवं करोतीति । **राजावक्षिपेत्** प्रत्ययार्थमवरोपितार्थमानं निर्भर्त्सयेत् । **स सत्रिभिरिति** । सोऽवक्षिप्तः सत्रिभिर्वक्ष्यमाणलक्षणैः प्रयोज्यैः । **शपथपूर्वं** स्वयं शपथं कृत्वा विश्वासार्थतां च कारयित्वा । राज्ञो भिन्नोऽयमिति ख्यापनार्थम् । **एकैकं** स्वाशयाविष्करणार्थम् **उपजापयेत्** भेदयेत् । किमित्याह—**अधार्मिकोऽयमिति** । धर्मेण चरति यः स तद्विपरीतः, येन मामप्ययाज्ययाजनादौ नियुङ्क्ते । तस्मात् **साधुधार्मिकं** साधुं धार्मिकं चेति । क्रियाविशेषणं वा साधु शोभनं **प्रतिपादयाम** इति । **अन्यमस्य** भ्रातरं पुत्रं वा । बन्धुविनाशानुशयात् ततो भवेत् प्रेक्षा चेत् **तत्कुलीनं** तत्कुलापत्यम् । तस्मादपि चेदाशङ्का ततोऽ**वरुद्धं** निर्धारितम् । स ह्यासन्नत्वात् स्निग्धतरो भवति । सोऽपि कृतार्थः पित्र्यापकारं स्मरिष्यतीति कुप्येत्, कश्चित् **कुलीनं** तं **चैकप्रग्रहम्** । राज्ञा सहैकपूजमित्यर्थः । स हि प्रजानुमतो भवति । निराश्रयोऽसाविति चेत् **सामन्तम्** । प्रति वैतस्माच्चेत् पूर्ववासनया स्वप्रवृत्त्यवग्रहाशङ्का **आटविकं** राजसधर्माणम् । तस्माच्चेदनार्यपरिवाराशङ्का **उपपादकम्** । अकस्मादुत्पत्तिशीलम् अराजबीजिनमित्यर्थः । चन्द्रगुप्तप्रकारसाधुधार्मिकमिति सर्वत्र योज्यम् । **प्रतिपादयामः** किमित्यर्थाद् राज्यमिति गम्यते । तत्राप्रतिपत्तिमनर्थभयापेक्षां निरसितुमाह—**सर्वेषामेतद्रोचते** **कथं** वा (भव ? तवे)त्यभिप्रायप्रश्नः । **प्रत्याख्याने तु शुचिरिति** । स चेद्विमृश्यकारी यद्यपि पुरोहितस्येदं मतं तथापि विचार्यम् । अवक्षिप्तत्वाद्धर्षेणायं वदति स्वधर्मं तावदपेक्षे अधार्मिकोऽस्तु मा वा राजा किं ममात्र । स्वाम्यनभिद्रोहो मे धर्मः । तथा चाहुः—

> ब्रह्मद्रुहां च ये लोका गुरुपुत्रद्रुहाश्च ये ।
> पतिद्रुहां च ये स्त्रीणां ते समस्ता नृपद्रुहाम् ॥

इति । मैवमिति प्रत्याख्याने याथातथ्यपरिज्ञानाच्छुचिरितीयं परीक्षा **धर्मोपधा** ॥

**सेनापतिरित्यादि** । अमुं दासीपुत्रं सत्कारेण पूजयेति राज्ञा उक्तः, स तेनासत्प्रग्रहेण असतः पूजया अमृष्यमा(णो ? णेन) रा(जा ? ज्ञा) कृतसंवित्केन अवक्षिप्तः अवरोपिततदर्थमानः **सत्त्रिभिरेकैकमुपजपेत्** ।

सेनापत्यायत्तत्वादर्थस्येति । भूमिकोशहस्त्यादिना अर्थेन राजविनाशाय राजविनाशार्थमुपजपेत् । सर्वेषामेतद्रोचते कथं वा तवेति । तत्रेदशोऽर्थः धर्मादिविरोधी न न्याय्य इति प्रत्याख्याने शुचिरितीयं परीक्षा अर्थोपधा ॥

परिव्राजिकेति । वक्ष्यमाणगुणा परिव्राजिका लब्धविश्वासा श्रद्धेया। अन्तःपुरे कृतसत्कारत्वादनिवार्यप्रवेशा । महामात्रं महती मात्रा यस्येति तम् । एकैकमुपजपेत् । राजमहिषी नान्या काचित् त्वां कामयते । कश्चिदशक्यत्वात् प्रत्याचक्षीतेत्याह—कृतसमागमोपाया वर्षवराद्यरूपग्रहणात् । महानर्थश्च ते भविष्यतीति । नन्वर्थोपधापीयं कुतो निर्णयः । एवं तर्हि महान् कामप्राप्त्यैव पुरुषार्थस्ते भविता । यथाहुः—

धर्मार्थयोः फलं कामः कामः स्त्रीभोगमुख्यकः ।
स्त्रीषु रूपवती श्रेष्ठा सुरूपासु सयौवना ॥

इति । अथवा महाननर्थो महानर्थः अनङ्गीकरणे तत्क्रोधाद्भवितेति । अगम्या हि राजदारा इति काम्याकाम्यपरिज्ञानात् प्रत्याख्याने शुचिरितीयं परीक्षा कामोपधा ॥

M. 17. प्रहवणनिमित्तमिति । प्रहूयन्ते हूयन्तेऽस्मिन् स्वजनमित्राणीति प्रहवणम् उद्वाहादिरुत्सवः, तन्निमित्तम् । एकोऽमात्यः प्रधानमन्त्रीत्यर्थः । स राज्ञा कृतसवित्कः सर्वानमात्यान् स्वगृहेऽन्यगृहे वा आवाहयेत् मेलयेत् । तेनोद्वेगेनेति तेषामेकत्र मेलनात् तेन भयेन । राजा मदपचिकीर्षया हि यूयं संहताः तिष्ठत तावद् विचारयामीति तानवरुन्ध्यात् पृथक् सह वा । कापटिकश्च वक्ष्यमाणलक्षणस्तत्रास्मिन्नवरोधस्थाने दूतादिव्यपदेशेन पूर्वावरुद्धः । तेषां मध्येऽर्थमानावक्षिप्तम् अर्थमानाभ्यां च्यावितम् T. 50. एकैकमुपजपेत् । असत्प्रवृत्तोऽयम् । असदशोभनं प्रवृत्तमस्येति येनादुष्टमानसमप्येवं कृतवान् । अत एनं हत्वाऽन्यं प्रतिपादयामः सर्वेषामेतद् रोचते कथं वा तवेति । यद्येवं स्यात् किं न्विदमेवमेव, अथवा अयमपरागाद् ब्रवीतीति, अथवा अलं चिन्तया सर्वथा निर्दोषोऽस्मि सर्वथा निष्प्रतिकारमस्मद्भयमिति प्रत्याख्याने शुचिरितीयं परीक्षा भयोपधा ॥

परिशुद्धानां नियोगमाह—तत्रेति । धर्मादिशुद्धेषु (ये) धर्मोपधाशुद्धास्तान् धर्मस्थीयकण्टकशोधनेषु धर्मप्रधानेषु स्थापयेत् । अर्थोपधाशुद्धान् समाहर्त्रादिकर्मस्वर्थप्रधानेषु । कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु ।

विहरन्त्यस्मिन्निति विहारः । तत्र बाह्यो विहार उपवनं बाह्यस्त्रीणां राजोपभोग्यानां वारविलासिनीनाम् । आभ्यन्तरो विहारो राज्ञीनाम् । तद्रक्षासु स्थापयेत् । भयोपधाशुद्धानात्मासन्नकार्येषु । सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात् । सर्वकर्मणां तदायत्तत्वात् । मन्त्रिपरिषदत्रैवान्तर्भूता । सर्वत्राशुचीन् धर्मादिष्वशुद्धान् खनिद्रव्यहस्तिवनकर्मान्तेषु उपयोजयेत् । (नात्रिकान्?) किन्तूपयोजयेदन्यैरधिकृतैः सह कारयेत् ॥

अत्र सम्यङ्मतपरिग्रहार्थमाह—त्रिवर्गभयसंशुद्धाविति । त्रिवर्गे भये च सम्यक् शुद्धान् स्वेषु कर्मस्वधिकुर्यात् । यथाशौचमिति । यस्य यत्र शौचं तं तत्राधिकुर्यात् । इत्याचार्या व्यवस्थिताः विशेषेण स्थिताः । नास्माभिस्ततोऽपनीयन्ते ॥

T. 51. किन्तु न त्वेव कुर्यात् न कथञ्चित् कुर्यात् । आत्मानं देवीं हत्वाऽन्यं प्रतिपादयामः, त्वां कामयत इति । लक्ष्यमधिष्ठानम् । ईश्वरो-लब्धैश्वर्यो राजा । शौचहेतोरमात्यानाम् । प्रधानदोषापाये(न?) इतरगुणानामुपायत्वं न युक्तमिति ॥

को दोष इति चेदाह—(न)दूषणमिति । परीक्षणात् प्रागदुष्टस्य अज्ञाततदोषस्य अनेनासता अधर्मेण अम्भस इवादुष्टस्य विषेण दूषणं न युक्तमित्यर्थः । तद्दूषणमधिष्ठाने चरेद् व्याप्नुयादित्यर्थः । पुरोहितादिभिर्दूषयित्वान्यैः नैवं युक्तमिति शोधयेदिति चेदाह—कदाचिद्धि प्रदुष्टस्य नाधिगम्येत भेषजम् । अनैकान्तिकत्वात् प्रतीकारस्य । अथवा न कदाचिदप्यधिगम्येत भेषजम् ।

यथाहुः—

पायसेन सकृद्दग्धो बालो दध्यपि शङ्कते ।
भायिताश्वासिता वाऽपि न विश्वसिति कर्हिचित् ॥

इति ॥

अयं चापरो दोष इत्याह—कृता चेति । कलुषीकृता बुद्धिरुपधाचातुर्विध्याच्चतुर्विधा । तेन वान्येन वोपायेन अगत्वान्तं राजानमविनाश्य देवीं वा नाधिगम्य न निवर्तेत । सत्त्ववतामारब्धकार्यावसायिनाम् । धृतौ अपि च शक्ता स्थिता सती ॥

M. 18. तस्मादेतद्दोषपरिहारार्थमाहाभिप्रायसिद्धये च—तस्मादिति । बाह्यं लक्ष्यं कृत्वा देवस्थानादिसंस्कारे तद्द्रव्ये वा तद्द्रव्ययोगे वेश्यायोजने

तुच्छतरापकारभायने च कार्ये चतुर्विधेऽपि । शौचाशौचं मार्गेत अन्वेषयेत् । न ह्येकत्र शुद्धोऽन्यत्राशुचिः स्वामिनो भीरवश्चेति । राजा मन्त्रिपुरोहितसखः एको वा यथायोगं मार्गेत । सत्रिभिरिति गूढपुरुषोपलक्षणं कापटिक-परिव्राजकयोरपि ग्रहणम् ॥

इति शौचाशौचममात्यानां सप्तमं प्रकरणम् ।

दशमश्चाध्यायः ॥

## अथैकादशोऽध्यायः

T. 52. अमात्यवर्गान्तर्भूतत्वात् गूढानामेव पुरुषाणाम् आमात्यशौ-चाशौचानन्तरं तद्विशेषगूढपुरुषोत्पत्तिरध्यायद्वयेनोच्यते । उपाधिभिरित्यादि । शुद्धोऽमात्यवर्गो यस्य स राजा गूढपुरुषान् गूढप्रयोगान् पुरुषान् उत्पाद-येत् रचयेत् । जातिशब्दत्वात् भिक्षुकान्तर्भावः । तत्र कापटिकादयः पञ्च संस्थासंज्ञाः, सत्र्यादयश्चत्वारः सञ्चारसंज्ञाः, द्वैराश्येन स्थिताः । तत्र पूर्वेषां लक्षणानि कर्माणि चास्मिन्नध्याये दर्शयन्नाह—परमर्मज्ञ इति । परेषां मर्माणि स्थानानि यानि तानि जानातीति तथा । तैर्हि परानुपतापयति । प्रगल्भो (द्द? धृ)ष्टः प्रत्यादेशसमर्थः । छात्रः निस्सङ्गत्वादुपतापनभयनिरपेक्षः, स सर्वत्र मित्रायमाणः कपटेन चरतीति कापटिकः । तमर्थमानाभ्यामुत्साह्येति । अर्थप्रदानेन पूजया च जनितोत्साहं मन्त्री ब्रूयात्—राजानं मां च प्रमाणीकृत्य अवधिं कृत्वा यस्य यदकुशलं कि(ञ्चिद्वि? ल्बि)षं पश्यसि तत्तदानीमेव कालमहापयन् प्रत्यादिश अस्मासु प्रकाशयेति । स तथा कुर्यादित्यर्थोक्तमेतत्कर्म ॥

प्रव्रज्याया इति । परिव्राजकभावाच्छ्रमणभावाद्वा प्रत्यवसितः श्रान्तः । प्रज्ञाशौचयुक्तत्वात् कर्मण्यः । स उदास्थित इत्येवंसंज्ञः । अपवर्गार्थमुद्यम्य निवृत्तत्वात् सर्वाश्रमत्यागादुत्कर्षाशयः । *.............................

दासस्तु कर्तव्या लोकद्वयबहिष्कृता । T. 54. M. 19. आशास्तय आशं-सनानि ताभिर्हेतुभिः, आगतानामङ्गविद्यया ज्यौतिषनिमित्तज्ञानादिकया । तैश्च संसृष्टवतां शिष्याणां स्वाङ्गस्पर्शादिसंज्ञाभिः । कर्माण्यभिजनेऽवसितानीति इदं ते कर्म वीणावादकत्वं वैश्यश्चासि सेवान्वेच्छसीति(?)प्रत्ययात् प्राग् आदिशेत् । अथवा कर्माण्येव यान्यभिजनापेक्षयाभीप्सितानि तानि वैद्यत्वेन जीवनमश्वद-मकत्वेन वेति । किञ्चाल्पलाभं श्वस्ते वस्त्रलाभो भविता । यथा चेयं बलाद् (?)

* इतः परं पत्रार्धपरिमिता ग्रन्थपङ्क्तयो मातृकायां लुप्ताः ।

दक्षिणपूर्वस्यामग्निरुत्थाता । चारेभ्यो भयं चाराणां वा पञ्चरात्राद् भविता । दूष्यवधम् । प्रष्टुमभिप्रेतं बुद्ध्वा कामस्ते सम्पन्नः येनासौ स्वामी सन्तुष्टः न सम्पन्नस्ते येनासावसन्तुष्टः । तत्कुलोपांशुप्रभृतीनामादाय नियमनं भविता । विदेशप्रतिज्ञानं कलिङ्गेषु राजा मृत इति आ पञ्चरात्राद्धि स्फुटमेतद् भविष्यतीति । इदमद्यैव राज्ञा दौर्मनस्यं सौमनस्यं श्वः पुनरिदं भविता इदं वा राजा शोभनमशोभनं वा करिष्यतीत्यादिशेत् ॥

T. 55. तदेतदल्पलाभादिकं गूढा अज्ञातप्रयोगाः सत्रिणः प्रच्छन्नचाराः संपादयेयुः लोकसंप्रत्ययार्थम् । सत्त्वेति । सत्येन प्रज्ञया वाक्येन वाग्मितया शक्त्या सामर्थ्येन संपन्नानां सपरिग्रहयोग्यानाम् । राजभाग्यमिति राजसंबन्धिवाक्यं पट्टसंबन्धादि दिव्येन चक्षुषा पश्यन्निव अनुव्याहरेत् । मन्त्री सन्मन्त्रित्वादाहूयाभिप्रायं पूरयिष्यतीति । मन्त्री चैषां सत्त्वादियुक्तानां सत्त्वाद्यनुरूपया वृत्त्यानुकर्मणा च विशेषेण यतेत । ये च राज्ञा सम्बन्धिनः कारणादभिक्रुद्धाः राजदोषेणेत्यर्थः । क्रुद्धग्रहण मुपलक्षणार्थं लुब्धभीतमानिनां च । तानमात्यान् अर्थमानाभ्यां शमयेत् । अकारणक्रुद्धान् स्वदौश्शील्यात् क्रुद्धान् । तूष्णींदण्डेन प्रच्छन्नदण्डेन । राजद्विष्टकारिणश्चेति राजद्विष्टं महान्तमनर्थं कर्तुकामान् तूष्णींदण्डेन शमयेत् ॥

पूजिताश्चेति । एते एवंधर्माणः न केवलं मन्त्रिणा राज्ञा च अर्थमानाभ्यां पूजिताः कर्मण्या भवन्ति । किञ्चिदपदिश्य राजोपजीविनां शौचं जानीयुः । एताः पञ्चाप्येकया संज्ञया संस्था इति प्रकीर्तिताः । तथा चाहुः—

चारोऽन्तेवासिना तेन भक्ताच्छादगृहाणि च ।
सन्तिष्ठते यतस्तेन संस्थास्ताः परिकीर्तिताः ॥

इति गूढपुरुषोत्पत्तौ संस्थोत्पत्तिरेकादशोऽध्यायः ॥

## अथ द्वादशोऽध्यायः

इदानीं सञ्चाराणां लक्षणानि योजनादीनाहुः । ये चास्येति । ये चास्य राज्ञः सम्बन्धिनोऽपि सन्तोऽवश्यभर्तव्याः बालवृद्धव्यसन्यनाथास्ते ह्युपगृहीताः कर्मण्याः, ये चाऽस्यसम्बन्धिन इति । तत्राऽस्यस्य स्वजनाः सम्बन्धिनश्च यथाकथञ्चित् सम्बन्धा इति । अथवाप्यानां सम्बन्धिनस्तत्प्रतिबद्धाः

पूर्ववच्चावश्यभर्तव्या इति । तेषां **लक्षणं** पुरुषहस्त्यादीनाम् । **अङ्गविद्यां** शिक्षादिकां वशीकरणाद्यर्थां भगिनीं तत्र प्रकारं(?)**मायायोग**मिन्द्रजालम् । आश्रमधर्मं गृहस्थादिधर्मम् । **निमित्तं** दिव्यान्तरिक्षभौमम् । **अन्तरचक्रं** शिवावायसादिरुदितम् । इतिशब्दादेवंप्रकारं धातुवादादिकम् । **अधीयानाः** पठन्तः । **सत्रिणः** सत्रं छद्म विद्यते येषामिति । **संस(र्गाद्वे ? र्गविद्या वे)**ति । संसृजनं संसर्गः, तद्धेतुकां नृत्तगीतवादित्रादिकां वा विद्यामधीयानाः पृथङ्निर्देशः सर्वजनसम्पर्कहेतुत्वादियमेव सर्वैर्विकल्प्यत इति ॥

**ये जनपद** इति । **शूरा** विक्रान्ताः । **त्यक्तात्मानः** शौर्यान्नात्मरक्षणपराः । **द्रव्यहेतोः** द्रव्यतृष्णया । ऐकात्मिकं प्राणनाशमात्रहन्तो **हस्तिनं व्यालं** व्याघ्रादिकं **योधयेयुः** न च्छद्मना हन्युः । **ते तीक्ष्णा** इत्यन्वर्थसंज्ञाः ॥

T. 57. **परिव्राजिके**ति । परिव्राजकधर्मे स्थिता, अनेकत्र वासाद् गमनागमेष्वशङ्कया पूज्या च । **वृत्तिकामा** राजार्थकारिणी । **दरिद्रा** अनन्यगतिः, अत एव वृत्तिकामा । **विधवा** न जीवद्भर्तृका स्वतन्त्रा । अन्ये पुनरविधवा इत्याहुः, अविधवा पुंस्कामेत्यर्थः । **प्रगल्भा** प्रतारणकुशला । **ब्राह्मणी** न क्षत्रिया, सा हि पूज्या भवति । **अन्तःपुरे कृतसत्कारा** पूजितपूजकत्वाल्लोकस्य । **महामात्रकुलान्युपेयानि** वा **अभ्युपगच्छेत्** । **एतया** परिव्राजिकया । **मुण्डाप्रव्राजिकावृषल्यः** (परिव्यः ?) परित्यक्तचारित्रधर्मा **व्याख्याताः** । वृत्तिकामा इत्यादि । एते चतुर्विधाः सत्र्यादयश्चतुर्विधाः **सञ्चाराः** सञ्चारयन्ति वार्तामिति कृत्वा ॥

गूढपुरुषत्वेऽप्येषां विनियोगभेदात् पृथक्त्वम् । तदाह—**तानि**त्यादि । **राजा प्राक् स्वविषये** मण्डले मन्त्र्यादिष्वपसर्पयेत् । अशुद्धस्वमण्डलस्य परमण्डलेऽपसर्पणासंभवात् । तत्र मन्त्रिणि पुरोहिते च तुष्टातुष्ट(त्व)मात्रज्ञानार्थम् । ततोऽन्येष्वेकाकी तत्सहायो वा अपसर्पयेत् । सेनायाश्चतुरङ्गयाः पतिः **सेनापतिः** । **युवराजः** कुमारः । विनीतत्वाद्यौवराज्येऽभिषिक्तः । **दौवारिको** द्वारे नियुक्तः प्रतीहारः । वंशः कुलमिति पर्यायत्वाद् राजकुलस्यान्तर्नियुक्ता अन्तर्वंशिकाः । स्त्र्यध्यक्षा अन्तःपुरिकाः । **प्रशास्ता** बलाधिकृतः । आयसमाहरणे नियुक्तः **समाहर्ता** देशव्यवहारी । **सन्निधाता** सम्यङ्निधाता स्थापयिता भाण्डागारिकः । **प्रदेष्टा** प्रकर्षेण देष्टा निबद्धवद्व्यवस्थापयिता कण्टकशोधनाधिकृतः । **नायकः** सहस्राध्यक्षः । वक्ष्यति—"तद्दशकस्यैको नायकः" (अधि. ११. अध्या. ६.) इति । **पौरव्यावहारिकः** पौराणां ये व्यवहारास्तत्र नियुक्तः । धर्मस्थ इत्यर्थः । **कर्मा-**

न्तिकाः सर्वकर्मान्तस्थानाधिकृताः । मन्त्रिपरिषत् मन्त्रिसमूहः । 'मन्त्रिपरिषदं कुर्वीत' इति वचनात् । तदध्यक्षो मन्त्रिपरिषदध्यक्षः (सान्ध्याविग्रहः ? सान्धिविग्रहिकः) । यस्य लक्षणममात्यसम्पदुपेतः सर्वसमयविदिति । दण्डपाला हस्त्यश्वरथपदात्यध्यक्षाः । दुर्गपाला नागरिकाः ।. (तो ? को)ट्टपालका इत्यर्थः । अन्तपालो जनपदान्तरक्षानियुक्तः । आटविकाः शबरादिनायकाः । एते(ष्व)- ष्टादशसु श्लिष्टत्वाच्छ्रद्धेयदेशादीनपदिशन्ति । तत्र देशान् द्रमिडोऽस्मि कालिङ्गोऽस्मीति । वेषं लिङ्गं परिव्राजकोऽस्मीति पाशुपतोऽस्मीति । भाषां देशालापम् एषास्मद्देशभाषेति । शिल्पं चित्रं लिखितुं वीणां वादयितुं जानामीति । अभिजनं जातिं वैश्योऽस्मीति । अन्वयं वा सूपकारपुत्रोऽस्मीति वैद्यपुत्रोऽस्मीति । एवंव्यपदेशांस्तान् । भक्तित इति । यस्य यत्र भक्तिः स्नेहोऽस्ति द्रमिडे पाशुपते वा । सामर्थ्ययोगाच्चेति । यो यत्र समर्थः कार्यं साधयितुं तत्र । अपसर्पयेत् चारयेत् ॥

T. 58. नियुक्तानां व्यापारमाह— तेषामिति । मन्त्र्यादीनाम् । बाह्यं चारं चरितम् । छत्राद्युपग्राहिणः छत्राद्युपग्रहणशीलाः अन्तःप्रवेशनार्हाः प्रत्यासन्न- वर्तिनो मर्मज्ञास्तीक्ष्णाः स्वाम्यादेशे यथेष्टव्यापारसमर्था विद्युः । तत्रासनं पीठिकादि । (वाहनं? यानं) युग्यादि । वाहनं हस्त्यश्वादि । तम् चारं बाह्यमुपलभ्य । सत्रिणः संस्थास्विति कापटिकादिषु यथायोगम् (स्थाप? अर्प) येयुः आचक्षीरन् ॥

M.21. आभ्यन्तरं के विद्युरित्याह—सूदेत्यादि । सूदः सूपकारः । आरालिकः कण्टकः । स्नापकः स्नापयिता । संवाहकोऽङ्गमर्दकः । आस्तरकः शय्याप्रसाधयिता । उदकपरिचारकः पानीयकर्मान्तिकः । एते रसदाः रसावचारणस्थाननियोगत्वात् । किमेत एवाभ्यन्तरं विद्युरित्याह—कुब्जादयश्च कुब्जवामनौ । किरातो म्लेच्छविशेषः । एते विदूषकादिच्छद्मानश्चान्तः पुरचारिणो विश्वास्याश्च । तत्र मूको यो न वक्ति । जडो यो न वक्ति शृणोति च । गायना वीणावादकाः । वाग्जीवनाः कथकादयः । कुशीलवा रङ्गोपजीविनः । स्त्रियश्च वृषल्यो निषिद्धोचितप्रवेशित्वाद् आभ्यन्तरं चारं विद्युः । तमि- त्यान्तरं चारम् । भिक्षुक्यः परिव्राजिकाः उचितनिष्क्रासप्रवेशाः (सर्पेयुः ? संस्थास्वर्पयेयुः ) ॥

T. 59. संस्थानां येऽन्तेवासिनः शिष्याः ते राजसम्भाषणस्य लक्षितत्वाद् गात्रस्पर्शादिसंज्ञाभिः सङ्केतिताभिः । चारसञ्चारमिति बाह्याभ्यन्तरयो- श्चारयोः सञ्चारं कुर्युः । न चान्योन्यमिति । न च संस्थाः संस्थान्तरम् । ते च

सञ्चारा न सञ्चारान्तरं विद्युः सङ्घायनपरिहारार्थम् । एकस्मिन् वा(ञ्छा? ज्ञा) ते मा भूत् सर्वग्रहणमिति । केवलन्तु सत्रिणो भिक्षुक्यश्च चारार्पणार्थं संस्थाभिः संसृज्यन्ते ॥

**भिक्षुकीप्रतिषेध** इति । तीर्थं चेत् स्वशङ्कया भिक्षुकीं निषेधयति तदा । **द्वाःस्थपरम्परा** इति । दौवारिकव्यञ्जनाः सत्रिणः प्रतिकक्ष्यपरम्परया भिक्षुकीष्वर्पयेयुरित्यर्थः । **मातृपितृव्यञ्जना** इति मातृपितृच्छद्मानः । **शिल्पकारिकाः** पत्रच्छेदादिकारिकाः । **कुशीलवदास्यो** रङ्गोपजीविदास्यः । **गीतेन** तद्वस्तुप्रतिबद्धेन सङ्केतितवेणुवीणावाद्येन । **पाठ्येन** द्व्यर्थनिबन्धनेन श्लोकपाठ्येन । **भाण्डेनान्तर्लिखितेन** । **गूढलेख्येन** पूर्वाचार्यकल्पितेन । तथा चोक्तम्—

ग्रहनयनवसुसमेतः षडाननोऽक्षाणि सागरा मुनयः ।<br>ज्वलनागण्डकश्रृङ्गद्वयलिखितं गूढलेख्यमिदम् ॥

इति । T. 60. अङ्गस्पर्शादिसंज्ञया वा यथायोगं **चारं निर्हरेयुः** निष्कासयेयुः । तदसम्भवे विधानान्तरमाह—**दीर्घरोगेति** । औपनिषदिकप्रयोगैरुत्पादितेन दीर्घरोगेण कुष्ठादिना, तद्दर्शनस्याप्रशस्तत्वात् । **उन्मादेन** असम्बन्ध-प्रलापहेतुना । तथा **अग्निरसयोः** प्रणिधानान्निसर्गेण व्यामोहितारक्षत्वाद् **गूढनिर्गमनं** प्रच्छन्नार्थनिष्कासनम् ॥

तत्रापि **त्रयाणामेकवाक्यत्वे सम्प्रत्ययः** । सम्यगैकान्तिकी प्रतीति-रित्यर्थः । कदाचिदेकस्य द्वयोर्वा परोपग्रहोऽसम्यगुपलब्धिर्वा स्यात् । **तेषामिति** चाराणाम् । **अभीक्ष्णविनिपाते** पुनः पुनर्विसंवादने । **तूष्णीं दण्डः** प्रच्छन्नवधः । **प्रतिषेधो** निवारणम् । मा भूत् प्रकाशवधे अन्यसञ्चाराणामुत्त्रास इति सकृद् द्विर्वा प्रमादाज्ञानादिभिः विसंवादयतस्तूपेक्षेत न पुनरेवं कार्यमिति ॥

इतरमण्डले गूढपुरुषप्रणिधानमाह—**कण्टकशोधनोक्ता** इति । समाहर्त्रा कण्टकशोधने वक्ष्यमाणे ग्राम्याणामध्यक्षाणां शौचाशौचज्ञानार्थं प्रणिहितास्तापसप्रव्रजितादयः । **अपसर्पाः** अपसर्प्यन्त इति कृत्वा ते । कापटिकादयश्च चशब्दात् । **परेषु** शत्रुषु । **कृतवेतनाः** कृतभृतयो **वसेयुः** । **सम्पातनिश्चारार्थमिति** । सम्पतन्त्येभिरिति सम्पाताः सञ्चाराः । तेषां **गूढस्थान-**

प्रवेशनिष्कासाः । तत्र निश्चरति इति निश्चारः । तदर्थके सम्यक्षिण्याचारिण (?) इति निरूपणार्थं तत्साक्षिणो **वसेयुः । त उभयवेतना** इति । ते चोभयवेतनाः स्युः स्वयमभृताः किमिति सङ्कटमवगाहन्ते । परैरभृताश्चाशङ्कनीयाः स्युः ॥

एतच्च कृत्वा साधारणार्थप्रतिबन्धकत्वाद् विधानान्तरमाह—**गृहीत-पुत्रदारांश्चेति** । प्रच्छन्नगुप्तपुत्रदारान् । दानमानाभ्यां वा गृहीतपुत्रदारान् **कुर्यात् ।** अव्यभिचारार्थम् । तांश्चोभयवेतनान् प्रचारनिश्चारार्थम**रिणा प्रहितान् विद्यात् । तेषा**मिति प्रहितानाममात्यानां चोभयवेतनानाम् । **शौचम्** अस्मत्कार्यपरा इति । चकारादशौचञ्च विद्यात् । **तद्विधैरिति** । उभयवेतनप्रकारैः सिद्धतापसादिभिः, न तूभयवेतनैः । अरिसाधारणत्वाद् अनवस्थानिवृत्त्यर्थमेव-मुच्यते । तथा चाहुः—

कः समानाभिहारेण च्छन्नानुभयवेतनान् ।
भृत्यराशौ स्थितान् वेत्ति शङ्खे क्षीरकणानिव ॥

इति ।

T. 61. एवं कर्मसाक्षित्वेन स्थापितोभयवेतनो राजा **एवं शत्रौ मित्रे** तन्मित्रे मित्रामित्रवान्तर्भावं विजानीयात् । **मध्यमे उदासीने च** वक्ष्यमाणलक्षणे । **चरांश्छत्राद्युपग्राहिण आवपेत्** स्थापयेत् । **तेषाञ्च** विजिगीषुं त्यक्त्वा एकादशानां राज्ञां प्रत्येकम । **तीर्थेष्वष्टादशस्वपि** । मन्त्रिपुरोहिताः भर्तृकार्यमेषु स्थित्वा तरन्तीति तीर्थानि । तत्रैकादशसु राजसु तदीयेष्वात्मीयेषु च प्रत्येकमष्टादश-स्वपि तीर्थेष्विति सप्तविंशत्यधिकं शतद्वयं भवति ॥

एवं गूढपुरुषान् प्रणिधाय चरेषु प्रविभागार्थमाह—**अन्तर्गृहगता** इति । **तेषां** चराणाम् । **कुब्जादय** इति । अन्तर्गृहगता इति यात्रोचितप्रवेशत्वात् ॥

M. 22. न केवलं सञ्चारा **दुर्गेषु वणिजः संस्थाः** वैदेहकव्यञ्जनाः । **दुर्गान्ते** दुर्गस्य प्रान्ते । **सिद्धतापसा** इच्छाविख्यातसिद्धयः स्वापनविसर्जनाकर्षणो ....... ........स्थव्यञ्जना **उदास्थिताश्च राष्ट्रे** जनपदे स्युः । **जनपदान्ते च । व्रजवासिनः** गोरक्षकव्यञ्जनाः । गोपव्यञ्जनस्यास्मादेव विनियोगात् स पाशुपाल्य-प्रदिष्टायाम् (इत्या)दिनोत्पत्तिरवगन्तव्या । अथवोदास्थितविशेषोऽयम् , यतः "स वार्ताकर्मप्रदिष्टायां भूमौ" इत्युक्तम् । वार्ता च कृषिः पाशुपाल्यं वणिज्या चेति ॥

**वने वनचरा** इति । जनपदमध्येऽन्ते वा वनोद्देशे वनचराः **स्थाप्याः** वने चरन्तीति । ते च **श्रमणाटविकादयः** प्रव्रजितक्षपणकप्रकाराः । यान्

वक्ष्यति—"तेषामन्तराणि वागुरिकशबरपुलिन्दादयो रक्षेयुः" । (अधि. २. अध्या. १.) इति । परप्रवृत्तिज्ञानार्थमिति । परस्यावस्कन्दापसरणवार्ताज्ञानार्थम् । शीघ्राः शीघ्रगतयः । चारपरम्पराः चाराणां परम्पराः, अष्टमात्रगव्यूत्यन्तरिताः । ते हि द्रुतं वार्तां सम्पादयन्ति ॥

परस्य वेति । परप्रयुक्ताश्चैते बोद्धव्याः । तादृशैरेव तादृशा इति । समानशीला एव समानशीलान् विन्दन्ति । तथा चाहुः—"सर्पस्यैव पदान्यहिः स्वचेष्टितेन जानन्ति धूर्ता एव हि धूर्तचेष्टितम्" इति । तदेव दर्शयन्नाह—चारसञ्चारिण इति । चारसञ्चारणशीलाः परसंस्थाः स्वचारसञ्चारिभिः स्वसंस्थाभिर्बोद्धव्याः । गूढाश्च परगूढपुरुषास्तीक्ष्णरसादयः । अगूढसंज्ञितैः स्वगूढपुरुषैरगूढसंज्ञितैरिति । ननु च तांश्चारिप्रहितांस्तद्विधैर्विद्यादित्युक्तमेव किमर्थम् । सत्यम् । उभयवेतनाश्रयेणोक्तम् । इह त्वसाधारणं वेतनाश्रयेणोक्तम् ॥

T. 62. विशेषविधानार्थमाह—अकृत्यानित्यादि । न स्वभावतः अकृत्यान्, किन्तु कृत्यपक्षीयैः कृत्यवर्गभवैः कार्यैः छिद्रकथनावसर्पग्रहणादिभिः । हेतुभिश्च संश्रुत्यर्थान् विप्रलब्ध इत्यादिभिः । कृत्याकृतिः परं प्रकाशित्वात् (?) । परापसर्पज्ञानार्थम् । मुख्यान् अक्षुद्रान् । ते हि परोपजापयोग्याः । अन्ते जनपदस्य । आवासयेत् । परापसर्पणावहितैः संसृज्य न जनपदं प्रविशन्ति । तेषां कृत्यतया विश्वासस्थानीयत्वादिति ॥

सञ्चारोत्पत्तिर्गूढपुरुषोत्पत्तिः ।
अष्टमं प्रकरणम् ।
द्वादशोऽध्यायः

## अथ त्रयोदशोऽध्यायः

शास्त्रकार एव प्रकरणसम्बन्धमाह—कृतमहामात्रापसर्प इति । महती मात्रा येषां ते महामात्राः मन्त्रिपुरोहितादयः । तेषु कृताः स्थापिता अपसर्पा गूढपुरुषा येन स राजा । पुरभवान् जनपदभवांश्च अपसर्पयेद् विश्वासयेत् । केऽत्र कृत्याः कर्तव्याः तद्विपरीताश्चाकृत्या इति स्वविषये कृत्याकृत्यपक्षरक्षणमुच्यते । तत्र कृत्याकृत्यपक्षरक्षणपरिज्ञानोपायमाह—सत्रिण इति । द्वन्द्वं वैरं तद्विद्यते येषां ते (द्वन्द्विनः) । संवरणार्थमितरे-

तत्प्रख्यातवैराः । तीर्थेषु पुण्यस्थानेषु । पूगस्य तपस्विसङ्घस्य समवायः । सभासु मण्डलेषु । जनपदसमवायेषु । विवादं प्रकरणोपहितं कलहं कुर्युः । सर्वगुणसम्पन्नश्चायं राजा देशान्तरेऽस्माभिरन्यैश्च श्रूयते । न चास्यात्र गुणो दृश्यते । यथाहुः—"रागे सार्वगुण्यमेव विरागे दोषसामग्र्यम् ।" यश्चायं राजा अपरागः पौरजानपदान् अल्पविभवान् । पीडयति दण्डकराभ्याम् ॥

तत्र तस्मिन्नेवमुक्ते । ये वक्तारं संवादेन प्रशंसेयुः साधूक्तमिति ।ताननुवादिनस्तं च इतरो द्वितीयः सत्री प्रतिषेधयेत् । तिष्ठन्तु तावदस्यान्येऽ-गुणाः, दण्डकरादानेनैव तावदिहामुत्र च लोके युष्माननुगृह्णाति । तथा हि श्रूयते—

कृतयुगे किल अननुभूतदोषत्वाद् विनैव राजभिः स्वधर्मकर्माभिरताः प्रजा आसन् । त्रेतादौ कालदोषादनिवार्यलोकप्रसराः पत्न्यादिषु प्रवर्तन्ते (?) । इतरे कर्षकादयश्च । वैवस्वतं विवस्वत्पुत्रमन्वयगौरवयुक्तम् । राजानं पालयितारं चक्रिरे । कृतकृत्याश्च तेऽस्य षड्भागं व्रीह्यादीनां षष्ठं भागम् । पण्य दशभागं पणितव्यादीनां शङ्खलोहवस्त्रादीनां दशमं भागम् । हिरण्यस्य सुवर्णस्य राज्ञः कतिभाग इत्यत उक्तं तत्सर्वमेवाकरेषूत्पन्नं भागमेव भागधेयं कल्पयामासुः । ततो हि कामं श्रमफलमेषां राजैव दद्यात् । हिरण्यग्रहणं मणिमुक्तादाहरणार्थम् । तेन च यथोक्तभागेन भृता राजानः प्रजानां भृतनिष्क्रयार्थं योगक्षेमावहाः योगक्षेमयोरावहाः । योगाः कर्मणां प्रवर्तनाः; प्रवृत्तानां रक्षणं क्षेमः । तत्र योऽपराधाद् (नैजनो ? देहजो)दण्डः यश्च रक्षासाधनार्थो बलिः करसंज्ञः, (तेन ? तौ) भागत्वेन अपरिकल्पितावपि व्यवस्थार्थमुत्स्रष्टव्यौ । को ह्यत्रापकारो राज्ञाम् । अन्यथा हि तेषां प्रमाद किल्बिषम् अदण्डधरो राजा हरति । न चैव प्रजानामयमुपकारो यद्रक्षणम् । तासामपि हि प्रजानां किल्बिषम अयोगक्षेमावहा राजानो हरन्ति । तस्मादारण्यकाः अरण्यवासिनः । उञ्छ(शेषं ? षड्) भागमिति । उपसंहृत-सस्यात् खलात् क्षेत्राद्वा यदवकीर्णं धान्यादि तस्योच्चयनम् उञ्छ उच्यते । तस्य षड्भागमनादिर्सितमपि राज्ञो देवताया इवादृष्टार्थं भूमौ निर्वपन्ति प्रयच्छन्ति । तस्यैतद्भागधेयं योऽयमस्मान् गोपायति रक्षतीति । तान्निषिध्य क्षुद्रकानपि प्रतिषेधयन्नाह—इन्द्रयमस्थानमिति । इन्द्रो यमश्चात्र तत्कर्मादिचरणात् साक्षादिव वसतः । ऐश्वर्यप्रकर्षादिन्द्र इव अपक्षपातदण्डत्वाच्च यम इवायं प्रत्यक्षबाधप्रसादत्वादिति । प्रत्यक्षहेडप्रसादा इति । हेडो निग्रहः तेन यमः,

प्रसादेनानुग्रहेणेन्द्रः । अयं तु विशेषो यदस्य प्रत्यक्षौ हेडप्रसादौ । तान् राज्ञः **अवमन्यमानान् दैवो दण्डः** वह्न्युदकादिपीडा **स्पृशति । तस्माद्राजानो** रञ्जयितारः कृतघ्नैर्भूत्वा **नावमन्तव्याः । क्षुद्रकान्** दृष्टमात्रशरणान् **प्रतिषेधयेत्** सत्री । **किंवदन्तीं च** जनवादं निन्दया प्रशंसया वा को राजानमाहेति प्रतिविधानार्थं सत्रिणो विद्युः ॥

**येचास्येति** । ये जनपदमुख्या महत्तरा जनपदस्य **धान्यपशुहिरण्यान्याजीवन्ति** आददति आहृतवृद्धियोजनलाभेन उपजीवन्ति । **व्यसनेऽभ्युदये च** उत्सवे जाते **तैरेव** धान्यादिभिः जनपदस्योद्धारेण राज्ञो वा उद्धारोपायनादिभि**रुपकुर्वन्ति । कुपितं** बन्धुजनस्य राज्ञो वा तत्कुलीनं **व्यावर्तयन्ति** अन्तरा प्रविश्य प्रत्याययन्ति । **राष्ट्रम्** अपरागात् कुपितं सामादिभिर्वा यथायोगं व्यावर्तयन्ति वारयन्ति । **अमित्रं वा आटविकजनं वा प्रतिषेधयन्ति ।** राज्ञां वा अमित्रम् आटविकं वा व्युत्थितं संभावयन्तमुपगम्य दण्डकर्मणा प्रतिषेधयन्ति तदसम्पर्कार्थम् । **तेषामिति** मुख्यानाम् । **मुण्डजटिलव्यञ्जनाः** परमार्थतो येऽमुण्डजटिलास्तद्व्यञ्जनाः । **तुष्टातुष्टत्वमुपकारापकाराङ्गभूतं विद्युः ॥**

एषां भविष्यत्कृत्यानां रक्षणोपायमाह—**तुष्टानिति** । तुष्टानतिशयार्थं **भूयः** पूजामानाभ्याम् । **अतुष्टांस्तुष्टिहेतोरिति** । तुष्टिरेव भविष्यती हेतुः तदर्थम् । **त्यागेन** दानेन देयविसर्गादिना पञ्चविधेन **प्रसाधयेत्** तोषयेत् **। परस्पराद्वेति** । संहतत्वाद्दानमवमन्यमानानन्योन्यस्माद् **भेदयेत्** । यथा अपकाराय न संहन्यन्ते कुतश्चिदाश्रयादबहुमानानाश्रयेभ्यः सामन्तादिभ्यो भेदयेत् । तथा **अवरुद्धो** निर्धारितः । **तथापि** जनपदव्यपाश्रयादेव दानेन **अतुष्यतस्तान्** । **दण्डकरसाधनाधिकारेणेति** । दण्डकरयोः साधनेऽधिकुर्यात्, तेन साधनाधिकारेण । **जनपदविद्वेषं ग्राहयेत्** ते हि साधयन्तो नियतं तद्द्वेष्या भवन्ति । ततश्च जनपदमात्रसहायत्वात् तेन चेत्यक्ताः किमु तैस्तुष्टैः । तस्मादपवादमात्रपरिहारार्थं **विद्विष्टानुपांशुदण्डेन साधयेत्** । **जनपदकोपेन चेति** जनपदमेव वा प्रकोप्यैतेनैव साधयेत् । **गुप्तपुत्रदारानिति** । दुर्गादिप्रवेशितपुत्रदारान् वा जनपदाद् वियोजयितुमाकरकर्मान्तेषु **वा** तदध्यक्षान् **वासयेद्** अधिकुर्यादित्यर्थः । **परेषामास्पदभयादिति** । अन्यथा जनपदस्थिताः संस्थादिभावेन परेषामास्पदमवस्थानं स्युरिति भयाद्वासयेत् ॥

केनपुनः स्फुटाः कृत्याकृत्याः कुद्धादयो वक्ष्यमाणलक्षणाः **परेषां** शत्रूणामात्मसात्कर्तव्यतया **कृत्याः** । तेषां रक्षणोपायमाह—**तेषामिति** ।

**कार्तान्तिकनैमित्तिकव्यञ्जना** इति । कृतान्तः सिद्धान्तोऽभिधीयते । कृतान्तमधीयत इति कार्तान्तिकाः निमित्तमधीयत इति नैमित्तिकाः । तद्व्यञ्जनाः, इदं शुभमशुभं वा भवितेति समादिशन्तः प्रष्टृणामाविष्कृतमनोरथाः । **परस्पराभिसम्बन्धमिति** । बाह्यानां बाह्यैराभ्यन्तराणामाभ्यन्तरैः सम्बन्धमुपजापम् । **अमित्रसम्बन्धं वा** कः केन राज्ञो मित्रेण सम्बध्यत इति विद्युः । तत्र स्वराजन्येव **तुष्टान्** अकृत्यान् प्राप्तपूजानपि दार्ढ्यार्थं अन्येषां तथाचरणार्थं भक्तिमेव प्रख्याप्य **दानमानाभ्यां च पूजयेत्** । **अतुष्टानतस्तत्र** कृत्यान् । **सामदानभेददण्डैः** क्रमविधानार्थं प्रतिपदग्रहणम्, **शमयेद्** अकृत्यतामापादयेदित्यर्थः ॥

उपसंहरन्नाह—**एवमिति** । पूजया सामादिभिश्च **कृत्यानकृत्यांश्च विचक्षण** इति वैचक्षण्यादन्यानप्येवं जानीयादिति । **परोपजापात्** शत्रुकृताद्भेदात् सम्यग् रक्षेत् **प्रधानानमात्यान् क्षुद्रकान् जानपदान्** इति ॥

**इति स्वविषये कृत्याकृत्यपक्षरक्षणं नवमं प्रकरणम् ।**
**त्रयोदशोऽध्यायः ॥**

## अथ चतुर्दशोऽध्यायः

शास्त्रकार एव प्रकरणसम्बन्धमाह—**कृत्याकृत्यपक्षोपग्रह** इति । ननु च सामर्थ्यादेव गम्यते स्वविषये व्याख्यात इति, वक्ष्यमाणत्वाच्च परविषये वाच्य इति । तस्मादयमर्थः । स्वविषये कृत्याकृत्योपग्रहो यस्तुष्टान् भूयः पूजयेद् अतुष्टान् सामादिभिः साधयेदिति, स परविषयेऽपि वाच्यः । राज्ञो गुणैरनुरक्तान् पूजयेद् अतुष्टान् सामादिभिरात्मसात्कुर्यादिति ॥

क्रुद्धादीनां कृत्यानां लक्षणमाह—**संश्रुत्येत्यादि** । "साहस्रो राजपथः" (अधि. १०. अध्या. ३) इत्यादि संश्रुत्य प्रतिज्ञायार्थान्, कृते कर्मणि अदानादल्पदानमानाद्वा **विप्रलब्धो** वञ्चितः क्रुध्यति । **तुल्यकारिण** इति । **शिल्पविषये उपकारविषये** वा दर्शिततुल्यास्त्रशास्त्रशिल्पत्वाद्वा कृततुल्योपकाराद्वा **विमानितः** कृतहीनमानः क्रुध्यति । **वल्लभावरुद्धः** राजवल्लभैरवरुद्धः सुभगातत्पुत्रभ्रात्रादिभिर्वा परिभूतः क्रुद्ध एवास्ते । **समाहूय पराजित** इति । अर्थपतिना आत्मपतिना मित्रवता बलवता प्रचण्डेन **गुरुणा** नीचेन तपस्विना सह विवादं वर्जयेदिति परिहरन्नपि सम्यगहं ते व्यवहारं द्रक्ष्यामीति

आहूय सत्येनानृतेन वा पराजितो भ्रंशितच्छायः क्रुध्यति । **प्रवासोपतप्तः** नित्यविक्षेपात् कलत्रविरहाद्युपतप्तः । **कृत्वा व्ययमलब्धकार्यः** कार्यमिदं मे प्रीतः करिष्यतीति द्रव्योपहारेऽप्यलब्धकार्यः अप्राप्ताभिप्रेतार्थः । **स्वधर्माद् दायाद्याद्वा** इति । पैतृष्वस्रीयोद्वाहादिकात् स्वधर्माद्वरुद्धो भ्रंशितः देशान्तरविरुद्धत्वात्, समाश्रयवद्भ्यो दायादेभ्यो लब्धव्याद्दायाद्यात् पैतृकाद्वरुद्धः । **मानाधिकाराभ्यामिति** । यथोचितान्मानादधिकारकर्मणः भ्रष्टो वियोजितः । **तुल्यैस्तत्कुलीनौचित्यैः प्रतिपक्षैर्वान्तरङ्गैरन्तर्हितो** बहिरङ्गीकृतः । **प्रसभाभिमृष्टस्त्रीकः** राज्ञो रक्षाशैथिल्यादन्यैः प्रसह्योपभुक्तकलत्रः । **काराभिन्यस्तः** कारो दण्डस्तत्राभिनिवेशेन त्वयेदमाशूपनेयमिति नियुक्तः । **परोक्तेन** परवचनेन अविमृश्य **दण्डितः** । **मिथ्याचारवारितः** । तथाचाहुः—

"हिते कल्यफले नित्यं नानुशिष्यान्नरं बुधः ।
रिपूभवन्ति दुष्प्रज्ञा मिथ्याचारान्निवारिताः ॥"

इति । (इति क्रुद्धवर्गः) ॥

**स्वयमुपहतः** आत्मदुश्चरितेन उपहतः, राजकार्यविनाशात् स बिभेति । **विप्रकृतोऽभिशस्तः** भीत एवास्ते । **पापकर्माभिख्यातः** चौर्यादिना प्रख्यातः । **तुल्यदोषाणामन्येषां दण्डेनोद्विग्नः** ममापि भविष्यतीति । **पर्यात्तभूमिः** समन्तादात्ता गृहीता राजकीया भूमिर्येन स भीत एवास्ते । **सहसोपचितार्थः** अकस्माद्विना सम्भावनां निधिलाभादिना उद्भूतार्थः शङ्कित एवास्ते । **तत्कुलीनो वाशंसुः** तत्कुलीनः कदाऽहं राजा स्यामिति स्वयं च आशंसनशीलस्सन् नित्याशङ्कित एवा(स्ते) । **प्रद्विष्टो राज्ञा** दोषाद्दौर्भाग्याद्वा राज्ञा द्विष्टः कथमहं वर्त इति । **राजद्वेषी च स्वयं** राजद्वेषणशीलः स्वदोषाद् भीत एवास्ते, अपकारोत्प्रेक्षित्वात् । इति भीतवर्गः ॥

M. 25. **परिक्षीण** इति । परतो युग्याद्यपचयाद् दुर्भिक्षादेश्च कारणात् प्राप्तक्षयो लुभ्यति । **अत्यात्तस्वः** बहु यस्यात्तं गृहीतम् अल्पं शेषं च सोऽल्पया मात्रया पूर्वराशिमाचेतुकामो लुभ्यति, सर्वस्वमाहारितस्तु च्छिन्नतृष्णाबीजो न लुभ्यत्येव । **कदर्यः** आत्मभृत्यपीडया धनाप्तिपरः । मू(ढो रहः? लहरः)पितृपैतामहोपात्तम् अन्यायेन 'भक्षयति । तादात्विको यद्यदुत्पद्यते तत्तद्भक्षयति यः, त्रयोऽप्येते लुब्धाः । **व्यसनी** (भू? द्यू)तादिव्यसनानामर्थसाध्यत्वात् लुभ्यति । **अत्याहितव्यवहारः** स्वविभवादधिकप्रस्तुतधर्मादिव्यवहारोऽत्यन्तं लुभ्यति । इति लुब्धवर्गः ॥

**आत्मसम्भावित** इति। विद्याभिजनत्यागशौर्यरूपादिव्यपदेशेन आत्मनैव सम्भावितः कोऽन्यो मदधिक इति। **मानकामः** स्वामिन आत्मनो मानमिच्छति। **शत्रुपूजामर्षितः** प्रतिपक्षपूजामसहमानः मानीति गम्यते। **नीचैरुपहितः** हीनैः सह स्थानमानाधिकारनिवेशितो विकृतश्चेन्मानी। **तीक्ष्णस्तेजस्वी,** स हि हुङ्कारमप्यसहमानः स्पष्टमान एव। **साहसिकः** साहसेन चरतीति। तथा सति मानाभ्यधिकः। **भोगेनासन्तुष्टः** मानिनो न भोगेन सन्तुष्टाः। इति मानिवर्गः॥

लोभो मानश्च पुरुषधर्म एभिर्निमित्तैर्व्यज्यते। सर्वत्र वर्गग्रहणं क्रुद्धादिसम्बन्धिनोऽपि....इति केचिदाहुः। तत्प्रतीकारोपग्रहार्थमित्यन्ये। यथोच्यते—

"क्रोधो दोषस्वभावाभ्यां दोषः स्वस्वामिसम्भवः।
कृत्यः कृत्यतरस्ताभ्यां स्वभावान्नातिकृत्यता॥

भयं दोषस्वभावाभ्यां दोषः स्वस्वामिसम्भवः।
कृत्यः कृत्यतरस्ताभ्यां स्वभावान्नातिकृत्यता॥

लोभः क्षयस्वभावाभ्यां दैवः स्वस्वामिसंभवः।
क्षयोऽन्यः स्वज इत्यस्य शेषेभ्यो नातिकृत्यता॥

मानः स्वामिस्वभावाभ्यां सोऽस्थाने स्वामिना कृतः।
चालितस्तदवस्थश्च कृत्यं नयति कृत्यताम्॥"

इति। मिथ्याचारवारिते कामहर्षावन्तर्भूतौ। मदोऽप्यात्मसम्भावित इति॥

T. 69. तेषु परस्थेषु स्वीकरणार्थमुपजापविधिमाह—**तेषामिति**। क्रुद्धादीनां मध्ये। यः **कृत्यपक्षीयः** कृत्यपक्षभवः। पक्षग्रहणं तत्सम्बन्धस्याप्युपसङ्ग्रहणार्थम्। **यद्भक्तिः** यो यत्र मुण्डे जटिले वा भक्तिरस्येति। **तं तेनोपजापयेत्**। तस्य श्रद्धेयत्वात्॥

**यथे**त्युदाहरणमाह—**यथा मदान्धो**विवेकासमर्थः **हस्ती**त्युपकारसमर्थोदाहरणम्। **मत्तेन** तादृशेनैव **आधोरणेन** अधिष्ठितत्वादुपोद्बलितचापलः **यद्यदासादयति** प्राप्नोति **तत्तत्सर्वं मृद्नाति** नाशयति। **एवमयम्**। अविद्यमानं शास्त्रं चक्षुरिव यस्य। अथवा अविद्यमानं शास्त्रं चक्षुःस्थानीयश्चामात्यो यस्य सः। **पौराणां जानपदानां** दोषच्छलेन **वधे योजितः** परिक्लेशेऽर्थहरणे च। **शक्यमस्य प्रतिहस्तिप्रोत्साहनेन (अपकर्तुम्)**

प्रतिहस्तिनमिमं शास्त्रचक्षुषमेनं राजानम् उपजापेन प्रोत्साह्यापकर्तुम् । अमर्षः क्रियताम् तन्मात्रप्रतिबन्धत्वात् प्रतिकारस्य । इति क्रुद्धवर्गमुपजापयेत् दृष्टान्तदार्ष्टान्तिकयोरनुरूपत्वात् ॥

यथा बिले वसन् सर्पो लक्षणं नापराधकालं यस्माद्भयं सहसोपस्थितं पश्यति उत्प्रेक्षते तत्र विषमुत्सृजति आत्मनेत्थं विषोत्सर्गापकारेण तं प्रथममवसादयति । एवमयं राजा अविष्कृतापकारलिङ्गः सता असता वा दोषेण जाताशङ्कः त्वयि पुरा नचिरात् क्रोधं विषमिवान्तर्हितमतर्कितमुत्सृजति । अतस्त्वयान्यत्र तन्मित्रेभ्योऽप्यन्यत्र राज्ञि गम्यतामिति भीतवर्गमुपजापयेत् ॥

यथा श्वगणिनामिति । श्वगणो विद्यते येषां ते श्वगणिनः तेषाम् । साधारणक्षीरापि धेनुः सम्परिग्रहदौरात्म्यात् श्वभ्य एव दुह्यते नैव कदाचिद् ब्राह्मणेभ्यः, एवमयं राजा श्वगणधेनुप्रकारः सत्त्वप्रज्ञाशक्तिवाक्यहीनेभ्यो दुह्यते, नात्मगुणसम्पन्नेभ्यो भवद्भ्यः ब्राह्मणकल्पेभ्यः । असौ राजा पुरुषविशेषज्ञत्वात् सेव्यतामिति लुब्धवर्गमुपजापयेत् ॥

T. 70. यथा चण्डालोदपान इति । चण्डालानां कूपश्चण्डालसम्पर्कादपवित्रीकृतस्तेषामेवोपभोग्यो नान्येषां गर्हितत्वात् । एवमयं राजा न साधुप्रकृतिः नीचानामेवानार्याणां भोग्यः न त्वद्विधानामार्याणाम् अभिजनादियुक्तानाम् । असौ राजा पुरुषविशेषज्ञतयानुमीयमानाभिजनः, स त्वया सेव्यताम् । सेव्यत्वादभिगम्यत्वाच्च सेव्यः स एव त्वां यथार्हदानमानाभ्यामाराधयिष्यति इति मानिवर्गमुपजापयेत् ॥

M. 26. उपजप्तेषु स्वीकरणार्थं विधिमाह—तथेति । सर्वप्रकारप्रतिपत्त्यर्थं तथाग्रहणम् । प्रतिपन्नान् गृहीतोपजापान् । संहितान् कृतसन्धीन् । पणकर्मणेति । त्वयेदं कार्यं मयेदं कार्यमिति व्यवहारः पणः । तेन कर्मणा । पणार्थं वा कर्म शपथस्तेन । अव्यभिचारार्थं योजयेत । यथाशक्तीति । यो यत्र शक्तस्तेषु समाहर्त्रादिषु कर्मसु तान् योजयेत् । तत्रापि सापसर्पान् अभिप्रायज्ञानार्थम् ॥

लभेतेति । सामदानाभ्यां वक्ष्यमाणलक्षणाभ्याम् । परभूमिषु परभूमौ वर्तमानान् । लभेत प्राप्नुयात् । अकृत्यान् भेददण्डाभ्याम् । ननु च भेदेन

लभेतेति युक्तम् । को हि पूर्तैः परस्मान्न भिद्यते । दण्डेन तु कथं लभ्यन्ते, उपांशुदण्डेन परापदेशेन अस्मत्स्वामिकृतोऽयमित्युद्वेजिता लभ्यन्ते । परदोषांश्चेति परस्य शत्रोर्दोषांश्च सर्वेभ्यः प्रकाशयेत् । येन तद्दोषभिन्नमनसो लभ्यन्त इति ॥

इति परविषये कृत्याकृत्योपग्रहो दशमं प्रकरणम् ।
चतुर्दशश्चाध्यायः ॥

## अथ पञ्चदशोऽध्यायः

T. 71. शास्त्रकार एव सम्बन्धमाह—कृत इति । अकृतस्वपक्षपरपक्षस्वीकारस्य कार्यारम्भांश्चिन्तयितुमशक्यत्वात्, तत्रापि स्वपरपक्षाश्रयाणां कार्याणां शक्तिदेशकालानुपातिनां मन्त्रनिश्चयपूर्वकत्वात् तन्निश्चयार्थं मन्त्राधिकार उच्यते यदाह—मन्त्रपूर्वाः सर्वारम्भा इति ।

यत्र मन्त्रश्चर्यते तमेवोद्देशमाह—तस्योद्देश इति । तद्देशः संवृत इति । संवृतोऽल्पावकाशः, बहुपरिहारार्थम् । कथानामविस्रावीति अगम्भीरत्वात् प्रतिशब्दविवर्जितः । पक्षिभिरपीत्यतिशयार्थः । तैरप्यनालोक्यः स्यादित्यर्थः । जालकाद्यावरणाभावात् दूरीकृतमेव शब्दश्रवणम् । श्रूयते हि—मैथिलेषु किल सर्वसेनः कुमारो नागरिककलहंसकेन मातुलसोमिलेन च पितरं देवसेनं व्यापादयितुमुत्साह्यमान इति अधिकच्छत्रधारपुत्रेण कर्मान्तनियुक्तेनावेदितम् । मन्त्रकाले ततो राज्ञा मन्त्रिपुरोहिताभ्यां प्रधार्योक्तं कलहंससोमिलौ वध्यतामिति । तद्वचनमावृत्तिमदुपश्रुत्य शुकेनोपवनदीर्घिकाहंसकीर्तनानन्तरं हंससोमिलौ वध्येतामिति सहसासकृच्च श्रुत्वा जातशङ्कया देव्या सुलोचनया तथा सन्दिष्टः कुमारः सह ताभ्यामेव सरात्रावपसृत्याङ्गराजाश्रयान्मृते पितरि भ्रातॄनुच्छिद्य मगधानवाप्य शुकानां भयमादिदेश(?) । तथा मिलित्वा वणिक्कर्मनामा बलभद्रस्य विनयप्रभा भार्या प्रतिवेश्यवलयप्रकारधूर्तिसङ्गता प्रतिनिशं निर्गमनकाले तं सन्दिदेश । उदकभ्रमेण गम्यतामिति । सोऽभिश्लाघमानो धूर्तिर्वा खल्वहमित्युक्तवान् तदुभयमपि वचनमाकर्ण्यावृत्तिमदुपश्रुत्य शारिका शरीरभ्रमो मे जात इति वणिजा व्याहृते भ्रमालापानुसन्धानात् भ्रमेण गम्यतां धूर्तिलः खल्वहमित्यसकृद् व्याजहार । उत्प्रेक्षितया शङ्कमानस्ततस्नायुश्चासौ स्नायुमापाशैर्भ्रममार्गनिहितैर्बुद्ध्वा तं भार्यां च कशाभिस्ताडितवान् इति (?) । ततः प्रभृति मन्त्रोद्देशात् शुकशारिकाश्चापनीयन्ते । (स ततोऽनुचितसमुचितदर्शनः ? श्वभिरिति ।

शुनकेऽनुचितसमुचितदर्शने) समक्षं पुच्छलालनधुक्षणेनाशङ्कितार्थसूचनान्मन्त्रो भिन्नः । एतद्व्यतिरेकेणान्यैरपि तिर्यग्योनिभिरित्यन्येतिहासकथासु श्रूयते । तस्मान्मन्त्रेऽयुक्तोऽनधिकृतः । नोपगच्छेत् समीपमपि न गच्छेदित्यर्थः । यश्च मन्त्रं भिन्द्यात् तस्य दण्डमाह—उच्छिंद्येत मन्त्रभेदी । राज्ञा वध्येत । मन्त्रभेदिनश्च छेदाच्छ्रोतुरुपलब्धुर्वानुरूपमाह—मन्त्रभेदी राजा मन्त्रभेदोऽस्यास्तीति सोऽरिभिरुच्छिद्येत । तदुक्तम्—"मन्त्रभेदो ह्ययोगक्षेमकरो राज्ञः" इति । वक्ष्यमाणेन सिद्धत्वात् ॥

मन्त्रस्य भेदहेतुमाह—मन्त्रभेद इति । दूतस्वामिनां दूतस्य मन्त्रिणः स्वामिनो राज्ञः इङ्गिताकाराभ्यां मन्त्रभेदो भवति । इङ्गितं यथावृत्तानुरूपक्रियाविष्करणम् । सा ह्यतथोचिता वृत्तिः । आकृतिग्रहणम् (अकृतिः?) आकारः । भ्रुकुटिमुखरागादिभिराक्रियतेऽनेन भाव इति आकारः ॥

T. 72. तस्येति इङ्गिताकारस्य । संवरणं निगूहनं कार्यमिति शेषः । आयुक्तपुरुषाः कर्मसचिवाः । तेषु मन्त्रकरणमन्याख्यातम् आयुक्तपुरुषाणां वाञ्छाकरणं (?) मन्त्रानिस्रावार्थम् । आ कार्यकालादिति समाप्तिकालं यावदिति । किमिति ते रक्ष्यन्त इत्यत्राह—तेषां हीति । तेषामायुक्तानामनतिधैर्यान्तरासङ्गः प्रमादः यश्च सुरा(स्मृत ?मद)संवरणत्वादन्तर्गतार्थप्रकाशनः प्रलापः । M. 27. कामादिररिषड्वर्गः । स एवोत्सिच्यते अतिरिच्यत इत्युत्सेकोऽधिक इत्यर्थः । तत्र स्त्र्यादिषु विश्वासाद् द्वेष्ये क्रोधात् । परोपजापलक्षणः प्रच्छन्नः कुड्यादितिरस्कृतः । अवमतो वा मूकादिच्छद्मा किमनेन अयं न शृणोतीत्युपेक्षितः ॥

प्रत्येकं मन्त्रयुक्तानां पुरुषाणां राजानुवृत्त्या अयोगक्षेमकरः तस्मान्मा भूद् भेद इति । गुह्यमप्रकाश्यमेको मन्त्रयेत चिन्तयेत् । प्रकाश्यं तु मन्त्रिभिरिति भरद्वाजो मन्यते । शास्त्रश्रवणकालमेव विशिष्टरूपदेशादाहितबुद्धिशक्तित्वात् । अन्यथा मन्त्रिणामपि मन्त्रिणो भवन्ति । यद्यप्ययमात्मसमाय एकस्मै शपथं नियम्याचक्षीत, सोऽपि तथैवान्यस्मै, सोऽप्यन्यस्मै, तथैषां मन्त्रिपरम्परा मन्त्रं भिनत्ति ॥

तस्मादेकस्य मन्त्रयमाणस्यास्य गुह्यम् । परे मन्त्रिणो न विदुः । कर्म किञ्चिल्लुब्ध्वापि । चिकीर्षितं कर्तुमिष्टम् । किन्त्वायुक्तपुरुषरक्षणेन क्रमेणारब्धारः आरम्भकाः जानीयुः । आरब्धं कुर्वन्त एव कृतमेव वा निष्पन्नं जानीयुः । इदमनेन चिन्तितमस्माभिर्निष्पादितमिति ॥

T. 73. नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः । एवं हि मन्यते....गुरुभिरभिविनीतसहजनिर्मलप्रज्ञस्यापि विज्ञातव्यानामर्थानामानन्त्यात्, ....*तिगृहीतौ वा तत्र न (?) T. 74. M. 28. द्वाभ्यां संहताभ्यामवगृह्यते वशीक्रियते मा भूद्राज्यापहरणदोषः । विगृहीताभ्यां तु परस्परसङ्घर्षेणैवानासाद्यमानार्थनिश्चयो विनाश्यते । (यथा) छान्दसवरश्छात्राभ्यामगृहीताभ्यामध्यापकः । तथा चाहुः—

" इतरेतरविद्विष्टमन्त्रिबुद्ध्यनुगो नृपः ।
विकलीभवति क्षिप्रमवरोऽध्यापको यथा" ॥

इति । ननु च त्रिचतुर्ष्वप्यतिप्रसङ्ग इत्याह—तत् त्रिष्विति । सत्यमेतत् । अगत्या त्वेवमाश्रीयते । त्रिभिश्चतुर्भिर्वा मन्त्रयेत इति । यतो बहूनां संहतत्वं कृच्छ्रेण कदाचिदेव भवति, विगृहीतत्वं तु स्यात् । तत्राप्यन्यथा पक्षपातबाहुल्यं राजानुगामित्वम् औदासीन्यं वा कस्यचित् स्यात् । एतत्सर्वं राज्ञा अशक्यादिपक्षतयोच्यते । तथा चाहुः—

" बहुभिर्मतिमद्भिश्च पण्डितो न विगृह्यते ।
संहतैरवगृह्णाति विद्वानेकोऽपि संहतान् ॥"

इति । महादोषस्तदुपपन्नं भवतीति । मन्त्रानुपलब्धिप्रकाशस्तु महान् दोषः । महादोषः अयोगक्षेमलक्षणो यस्य तदुपपन्नं प्रतिविहितं भवतीति । चतु( रै? र्भि) र्निश्चयात् ततोऽन्येषाम् अनाख्यानात् । अथवा, एकद्वित्वम् अवग्राहित्वविनाशित्वाभ्यां महादोषः । सम्प्रति तदभावेन कार्यं भवतीति । ततः परेष्विति । अधिकेषु विप्रकीर्णालापत्वात् कृच्छ्रेण कदाचिदेवार्थनिश्चयो गम्यते बाहुल्याच्च मन्त्रः कृच्छ्रेण कदाचिदेव रक्ष्यते ॥

T. 75. इदं तु युक्ततरमित्याह—देशकालकार्यवशेनेति । यस्मिन् देशे काले कार्ये वा सन्निहितः कुशलो वेति परिच्छिद्य । एकेन सह द्वाभ्यां वा स्वयमेको वा यथासामर्थ्यमिति । यथाशक्ति मन्त्रयेत । मन्त्रिप्रज्ञामुपजीवन् तद्दोषैर्नोपहन्यते । तथा चाहुः—

" दोषवन्तोऽह्यदोषत्वं विदुषो यान्ति मन्त्रिणः ।
सदोषैरपि दीप्ताग्निराहारैरुपचीयते ॥"

इति । मन्त्रश्च परिपूर्णाङ्गः कार्य इति दर्शयन्नाह—कर्मणामिति । कुसन्ध्यादिकर्मणामारम्भप्रत्यवायः परकीयमन्त्राद्विवसः ग्रहः (?) यथोच्यते—

---

* अत्र कियानपि ग्रन्थभागस्त्रुटितः ।

"मित्र एव मेऽहं संयुक्तो मन्त्र्यादिगणसङ्ग्रहम् ।
परस्य प्रथमं कुर्यात् प्रयोक्तुं सन्धिसंश्रयौ ॥
तत्कुलीनावरुद्धादिदूष्यगणसङ्ग्रहम् ।
प्रथमं परस्य कुर्यात् प्रयोक्तुं यानविग्रहौ ॥
प्रयोक्तुं वा गुणान् सर्वान् परस्यैतद्गुणद्वयम् ।
पूर्वमेवोपगृह्णीयात् सौकर्यं जायते तथा ॥ इति ॥ (?)

दुर्गादीनामारम्भोपायो नौशकटकुठाराद्युपादानं मनुष्यहरणञ्च । **पुरुषद्रव्यसम्पदिति** । सन्ध्यादौ पादार्धगुणहीनादिः पुरुषसम्पत् । दुर्गादौ मुख्यानां सत्त्वप्रज्ञादियोगः पुरुषसम्पत् । सन्ध्यादौ........रकुरो हस्त्यादिः द्रव्यसम्पत् । दुर्गादौ इष्टकापाषाणसारदार्वादिः द्रव्यसम्पत् । **देशकालविभाग** इति । सन्ध्यादौ "मूलवर्जं प्रणामनम्" (अधि. ७. अध्या. ३.) इति देशविभागः । "विशिष्टबलं भङ्क्त्वा सन्धिं याचेत" (अधि. १०. अध्या.३) । "मार्गशीर्षीं यात्रां यायाद्" (अधि. ९. अध्या. १.) इति कालविभागः । दुर्गादौ जनपदान्ते जनपदमध्ये चेति देशविभागः । वर्षासु दुर्गकर्म (शिरसि सेतुः ?) शरदि सेतुकर्मेति कालविभागः । **विनिपातप्रतीकार** इति । सन्ध्यादौ दुर्गादौ च क्रियमाणे यदुपघातः स्यात् तत्रायं प्रतीकारः । तत्र पूर्वस्मिन् प्रियहितानुवर्तनमितरत्र देशकालकार्यावस्थापनादिः ! **कार्यसिद्धिरिति** । एवं षड्भिर्गुणैरेतैः पर्येषेत क्षयात् स्थानं स्थानाद् वृद्धिरिति । विषयान्ते दुर्गमविषह्यमाश्रितः परकर्माण्युपहनिष्यामीति जनपदमध्ये समुदायस्थापनं भवतीत्यादि । **पञ्चाङ्ग** इति पञ्चावयव इत्यर्थः । यथोक्तमन्त्रपृच्छायाः क्रममाह—**तानिति** । अमात्यांस्त्रींश्चतुरो वा सन्निधाप्य **एकैकशः** प्रत्येकं **पृच्छेत्** । बोधज्ञानार्थं पूजार्थं कार्यादरार्थञ्च । **समस्तांश्च** विवादसंवादाभ्यां तत्त्वाभिनिवेशार्थमुत्तरकालार्थञ्च । **हेतुभिः** उपपत्तिभिः । **मतिप्रवेकान्** बुद्धिप्रकर्षान्वितान् । सहसैवानुतिष्ठेत् । यथाहुः—

"आदायादायमन्त्रि............त्थं भाषितुम् ।
यद्यदस्मद्धितं कृष्ण तत्तद्ग्राह्यः सुयोधनः ॥" इति । *

(इति मन्त्राधिकारः एकादशं प्रकरणम् ।
पञ्चदशश्चाध्यायः ॥)

* इतः परमनन्तराध्यायोपक्रमावधिर्ग्रन्थभागो मातृकायां लुप्तः ।

# अथ षोडशोऽध्यायः

T. 78. M. 30. **पादगुणहीनः परिमितार्थः** । परिमितोऽर्थो यस्मिन्निति । यथा जानासि (यथा?) सन्धिं विग्रहं वा कारयेति पराधीनार्थः स्वाधीनवचनः । **अर्धगुणहीनः शासनहरः** । यथादिष्टवचनहरत्वाल्लेखहर इत्यर्थः । "हरतेरनुद्यमनेऽच् (३. २. ९.) इत्यच् । यद्यपि सर्वत्र लेखोऽपि स्यात्, तथाऽप्यर्थप्रधानगुणभावविवक्षयैवमुच्यते ।

दूतस्य प्रधानविधिमाह—**सुप्रतिविहितेति** । सुप्रतिविहितानि सुकल्पितानि यानादीनि अध्वनि विघ्नप्रतिषेधार्थं गौरवार्थञ्च यस्य यत्र । **यानं** रथयुग्यादि । **वाहनं** हस्त्यश्वादि । **पुरुषाः** परिचारकाः । **परिच्छेदाः** पटकुटीमण्डपशय्यादिः । **प्रतिष्ठेत** गच्छेत् । गच्छतो विधिमाह—**शासनम्** आज्ञामिति स्वप्रसिद्धयोच्यते । परं प्रति तु निसृष्टार्थस्य प्रज्ञापनाज्ञापनाविज्ञापनार्थोक्तः? स्यात् । परिमितार्थाच्छासनहरस्य वचनश्चैत्रो । **एवं वाच्यः** उत्तरकाले; **परोऽन्यः** शत्रुर्मित्रम् उदासीनो वा। **वक्ष्यत्येवम्** अस्मत्प्रतिकूलमनुकूलं वा स्वार्थापेक्षया, **तस्येदं प्रतिवाक्यं** प्रतिकूलानुकूलापेक्षया । एवञ्च मया **प्रतिसन्धातव्यं** प्रतिसन्धानं कार्यम् । **अधीयानः** अविस्मरणार्थम् । गच्छेत् । **गच्छंश्च, अटवीति** । तात्स्थ्याद् उभयजनपदान्तरालवासिभिराटविकैः । **अन्तपालैः** उभयान्तदुर्गाधिकृतैः । **पुरमुख्यैः** उभयस्थानीयाधिकृतैः । **राष्ट्रमुख्यैर्जनपदमुख्यैः** । प्रत्येकं **संसर्गं** संश्लेषं **गच्छेत्** । आत्मीयैः परोपस्थापनार्थं परकीयैरनिष्टोपगमनप्रतिविधानार्थमुपजापार्थञ्च । **एवमनीकस्थानभूमिः** स्कन्धावारभूमिः । पत्त्यश्वरथहस्तियुद्धभूमिः । **युद्धकाले च राज्ञः** (प्रति?परि)ग्रहभूमिः कलत्रस्थानार्था । (उपचा? अपसा)रभूमिरपसरणभूमिः । **आत्मनः परस्याचावेक्षेत** । तथा **दुर्गप्रमाणं** सङ्ख्यासंस्कारविस्तारैस्तदनुरूपबलोपादानार्थम् । **उपलभेत** । **राष्ट्रप्रमाणं** कियता बलेनाधिष्ठीयते विमुच्यते वेति (शयोरेव?)**सारं** भोगम् । **वृत्तिं** जीविकाम् । **गुप्तिं** रक्षस्थानम् । **छिद्रं** व्यसनमिति । **पराधिष्ठानं** परस्य **स्थानं तेनैवानुज्ञातः प्रविशेत्** । आत्माशङ्कानिवृत्त्यर्थम् । T. 79. **शासनं स्वामिसन्देशं ब्रूयात्** । अनुज्ञात इति वर्तते । तत्रापि **यथोक्तं** यथासन्दिष्टम् । न तत्रोपग्रहाद् भयाद्वा अन्यथा ब्रूयादित्याह—**प्राणाबाधेऽपि** मरणेऽपि **दृष्टे** । अपिशब्दात् किमुत तद्विभीषिकोपग्रहयोरिति । सन्देशमाचिख्यासुराह्वयाय वा । **परस्य वाचि** वचने । **प्रसादम्** ।

असंरम्भिनिष्पीडिताक्षरत्वं (अ)द्रुतविलम्बितत्वं यथाप्रसिद्धालापत्वञ्च । वक्त्रे वैवर्ण्यभ्रुकुटिस्वेदादिरहितत्वं विकासत्वञ्च । दृष्ट्याम् ऊर्ध्वाधस्तिर्यक्प्रसारित्वमुत्फुल्लतां च प्रसादं लक्षयेत् । वाक्यपूजनं साध्वभिहितमिति । इष्टस्याभिप्रेतस्याप्रकृतस्याप्यर्थस्य परिप्रश्नम् । गुणकथासङ्गं तदीयगुणकथाभिः संसर्गम् । आसन्नमासनम् असन्नदेशोपवेशनम् । सत्कारं वस्त्रताम्बूलादिभिः । इष्टेषूत्सवादिषु स्मरणम् । विश्वासगमनं रहस्योपायेन दर्शनम् । एतत्तुष्टस्य लक्षयेल्लिङ्गम् । विपरीतं लिङ्गमतुष्टस्य लक्षयेत् । सामर्थ्यसिद्धमप्येतदतिशयज्ञानार्थम् । अतुष्टं रुषितं ब्रूयात् । रोषान्निग्रहीतुकामश्चेदिति वक्ष्यमाणं गम्यते । किं ब्रूयादित्याह—दूतमुखा हीति । सन्देशप्रापणाद् दूत एव मुखं येषामिति । न केवलमस्मद्राजा त्वञ्च दूतमुखः, अन्ये च भूतभविष्यद्वर्तमाना इति प्रसिद्धम् । तस्मादुद्यतेष्वपि शस्त्रेषु यथोक्तं वक्तारः वक्तुमेवंधर्माणो दूताः तृनोरूनोरूपम् (?) । तेषां दूतानाम् । अन्तेवासिनोऽन्तिकचराः परिचरा अवधार्हाः । किमिति प्रश्ने । अङ्गेत्यध्येषणायाम्, त्वमेव अधीष्व पृच्छामः येषां परिचारका अप्यदोषत्वादवध्याः कथं ते ब्राह्मणा वध्या इति । ब्राह्मणग्रहणं पुराकल्पापेक्षं प्रायोवृत्त्यपेक्षं वा । अन्तावसायिन इति पाठान्तरम् । तत्र तेषां ये चण्डाला भृत्यास्तेऽप्यवध्या इति । परस्य चैतद्वाक्यं स्वामिनो न मम । एष दूतधर्मः यत् परुषमपि सन्दिष्टमुच्यत इति ।

वसेदविसृष्टः न तु विसृष्टः कार्यशेषापेक्षया शङ्कनीयत्वात् । पूजया नोत्सिक्तः अहमनेन पूजित इति नोत्सिक्तचित्तः स्यात् । उत्सेको हि मन्त्रभेदकारणम् । परेषु बलित्वमात्मनो न मन्येत परं परिभवंस्तैरेवं परिभूयेत । M. 31. वाक्यमनिष्टमधिक्षेपादिकं परेषां सहेत मानोत्सेकप्रतिषेधार्थम् । स्त्रियो वेश्यादिका वर्जयेत्, मन्त्रभेदावज्ञाननिवृत्त्यर्थम् । पानञ्च भावज्ञानपरिभवपरिहारार्थम् । एकः शयीत । पार्श्वस्थितैः स्वप्नायमानस्य भावो ज्ञायेत । यदाह— सुप्तमत्तयोर्हि भावज्ञानं दृष्टमिति । T. 80. अविसृष्टश्च कृत्यपक्षोपजापं पूर्वकृतं तथा अकृत्यपक्षे गूढपुरुषप्रणिधानं रागापरागौ च तद्भर्तरि स्वभर्तरि वोपात्तं रन्ध्रञ्च व्यसनं प्रकृतीनाममात्यानां तापसवैदेहकव्यञ्जनाभ्यामुपलभेत । तयोर्नगरसमीपवर्तित्वात् । तापसवैदेहकव्यञ्जनयोरन्तेवासिभिः परिचारकैः । चिकित्सकपाषण्डकव्यञ्जनैरुभयवेतनैर्वा यथोक्तैरुपलभेत । तेषामसंभाषायामिति । परस्परसम्भाषणासम्भवे । कृतकयाचकादिप्रलापैः व्याधितोऽहमौषधेन मामनुगृहाणेति । एवं मत्तोन्मत्तसुप्तप्रलापेषु योऽयम् ।

तदसम्भवे पुण्यस्थानानि सत्रप्रपादीनि तेषु । देवगृहेषु विचित्रसंज्ञाभिः पूर्वसङ्केतिताभिः । लेख्यसंज्ञाभिः अङ्गविन्यासकल्पिताभिः प्रचारमुपलभेत ।

उपलब्धस्योपजापमुपेयात् । "यथा मदान्ध" इत्यादिना । परेण चोक्तः पृष्टः स्वप्रकृतीनां सङ्ख्यया सारतश्च परिमाणं नाचक्षीत । प्रभूतान् सारांश्च ज्ञात्वा प्रार्थयेत । अन्यथाभिभवेदित्याशङ्कया परस्य ज्ञानाध्यारोपव्याजेन तु प्रलीयात् । यदाह—सर्वं वेद भवानिति । भवानेव चारचक्षुः सर्वं जानाति "विदो लटो वा" (३-४-८३) इति लट् । वयन्तु आत्मव्यापारमात्रविद एवेति । परिच्छिन्नपराभिप्रायो वा कार्यसिद्धिकरं कार्यसिद्धिहेतुं परिमाणं ब्रूयात् । भाययितुकामश्चेत् सङ्ख्या साराधिकमादातुकामश्चेदुभयावयं (?) ।

T. 81. कार्यस्यासिद्धाविति । सन्धिविग्रहार्थकार्यस्यासिद्धौ । उपरुध्यमानस्तर्कयेत् । किमर्थं मां न प्रेषयतीत्यूहे तस्य प्रदर्शनार्थमाह—किं भर्तुर्मे व्यसनं मरणं गुणप्रातिलोम्यादिना पश्यन्नुत्प्रेक्षमाणो मामुपरुणद्धि । किमिति विनश्वरेण सन्दधे स्वयमेव वा क्षयव्ययव्यसनेन विनङ्क्ष्यतीति । स्वं वा व्यसनं शक्यं प्रतिकर्तुकामः प्रतिकृत्य यथेष्टं सन्धास्ये विग्रहीष्यामीति । अस्माभिरभियास्यमानः पार्ष्णिग्राहानुगुण्याय तदासारमन्तःकोपात् पुरा मन्त्र्याद्युपजापाद् देशविलोपनार्थं समुत्थापयितुकामः । मित्रं सहायार्थमुद्यतम् आक्रन्दं वा पार्ष्णिग्राहोद्यतं स्वीकरणेन विघातयितुकामः । स्वं वा परतः परस्माच्छत्रोः विग्रहम् उपस्थितं प्रतिपीडाभयात् प्रतिकर्तुकामः । अन्तःकोपम् उत्थितं संप्रेषणात् पूर्वं प्रतिकर्तुकामः । आटविकं वा उपस्थितं उपग्रहार्थं प्रतिकर्तुकामः । संसिद्धं वोपपन्नं मे भर्तुर्यात्राकालमभिहन्तुकामः । कालयापनेन सस्यकुप्यपण्यसङ्ग्रहम्, दुर्गस्य अ(निपि ? विहि)तत्वाद् दुर्गकर्म प्राकारादिसंस्कारम् । बलसमुद्दानं वा मौलादिबलसंभारम् अभियास्यत्कर्मणि वक्ष्यमाणं परबलापेक्षया कर्तुकामः । स्वसैन्यानां वा पत्त्यादीनां व्यायामस्यानुगुणं देशकालं वाकाङ्क्षमाणः प्रतिपालयितुकामः । परिभवात् कोऽयं यदनेन सन्दध्यादिति, प्रमादाद् अनवधानात् । (कार्यासक्त्या ?) T. 82. संसर्गानुबन्धार्थी वा कन्यादिप्रदानसंबन्धार्थी वा येन मामवरुणद्धीति । ज्ञात्वा वसेदपसरेद्वा स्वार्थं पश्यन् वसेत् । तस्यार्थं पश्यन्नविसृष्टोऽप्यपगच्छेत् । अन्यथा नापगच्छन्नरिणा नियम्येत ॥

M. 32. सङ्क्षेपेण दूतकर्माह—प्रेषणमित्यादि । प्रेषणं सन्देशप्रापणं परवृत्तान्तस्य वा प्रापणं तदेव व्यसनं पश्यतीति । सन्धिपालत्वं कृतस्य

सन्धेरनुवर्तनम् । प्रतापः शौर्यार्थो ख्यातिः । मित्रसङ्ग्रहः अटव्यन्तपाल-पुरराष्ट्रमुख्यानां संसर्गादात्मसात्करणम् । उपजापः तत्कुलीनावरुद्धादीना-मुपजापनं "साधारणगर्दभेन दक्षान्" (अधि. १३. अध्या. १) इत्यादिना । सुहृद्भेदः परदोषस्वामिगुणदर्शनेन । दण्डगूढातिसारणमिति परदुर्गे दण्डातिनयनं बक्ष्यमाणं गूढपुरुषप्रणिधानं च ।

बन्धूनां पुत्रादीनां व्युत्थापनार्थम् अपहरणं प्रख्यातगुणानां स्त्रीवाहनादिरत्नानामपहरणम् । चारज्ञानम् । यथोक्तं तापसवैदेहकव्यञ्जना-भ्यामिति । (सामेधिक इति । समेधा वृद्धिस्तस्यै प्रभवति । समेधाभिश्चेति समेधावृद्धेर्याः ?) । पराक्रमः छिद्रे प्रवीरपुरुषहस्त्यादिव्यापादनम् । समाधेः पुत्रस्य तद्वत्त्वं? दत्तस्य मोक्षणमभ्युच्चये सति । योगस्य शस्त्राग्निरसप्रणिधानस्य आश्रयः दूतस्य सन्धिविग्रहनियुक्तस्य आनुषङ्गिकं सर्वमेतत् कर्म एव ॥

T. 83. एतद् राजा स्वदूतैः कारयेत् परदूतांश्च एवंकारिणो रक्षयेत् । प्रतिदूतेनात्मीयेन अपसर्पेच छत्राद्युपग्राहिभिः पूर्वोक्तैः । दृश्यैः चोरादि-रक्षाव्यपदेशनियुक्तैः । अदृश्यैः अविज्ञातैर्गृहोपवासिभिः कुड्यान्तर्हितैर्वा रक्षिभिः राक्षाकुशलैरित्यर्थः ॥

इति दूतप्रणिधिर्द्वादशं प्रकरणम् ।
षोडशश्चाध्यायः ॥

## अथ सप्तदशोऽध्यायः

T.84. परदूतादप्यरक्ष्यमाणाद् अतर्कितोपनताद् राजराज्ययोरापदापतति । तस्मादुभयपक्षाणां सर्वथा यतितव्यम् । विशेषत आत्मरक्षायां यतो रक्षितो राजा राज्यं रक्षतीति राजरक्षणमधिक्रियते । रक्षितो राजा केन स्वयमेव राजवृत्त्यधिकाराद् राज्यं प्रकृती रक्षति । यथा दूतेभ्यः परार्थकारिभ्यो रक्ष्यस्तथा स्वार्थकारिभ्य आसन्नेभ्यो मन्त्र्यादिभ्यः परेभ्यश्च सामन्ताटविकेभ्यो रक्ष्यः, ततोऽप्यासन्नतरेभ्यः । अमित्रादयोऽहि बाह्या राज्यं हत्वा प्राणान् हन्युर्न वा, पार्श्वस्थास्तु प्राणान् हत्वा राज्यं हन्युर्न वा । अतः पूर्वं दारेभ्यः रहोविहारिभ्यः, पुत्रेभ्यश्च साधारणैश्वर्येभ्यो रक्ष्यः ॥

तत्रापि दारकृतस्योपद्रवस्य पुत्रार्थत्वात् तद्रक्षणमेव प्रधानमिति राजपुत्ररक्षणमुच्यते । यदाह—दाररक्षणं निशान्तप्रणिधौ वक्ष्यामः

राजपुत्ररक्षणमिति........कारः । अथवा दाररक्षणं निशान्तप्रणिधौ भविष्यतीति शेषः । अधुना **वक्ष्यामः पुत्ररक्षणमिति** । ते रक्षिताः आत्मापि तेभ्यो रक्षितो भवति । स्वमतान्यमतसामान्यमाह—**जन्मप्रभृतीति** । प्रसवात् प्रभृति । **राजेति** राज्ञो रक्ष्यमाणत्वात् कर्त्रन्तराशङ्कानिवृत्त्यर्थम् । आत्मरक्षार्थं **पुत्रान् रक्षेद्** वक्ष्यमाणैरुपायैः ॥

रक्षणोपाये मतान्तराण्याह—**कर्कटक इति** । धर्मशब्दस्य कर्मार्थत्वात् समानकर्माणः । केनेत्याह **जनकभक्षा इति** । ते हि जनकमविनाश्य तदुदरान्निष्क्रामन्ति । एवं राजपुत्राः सागन्ध्यात् पितृविनाशेन तत्प्रकृतिभिरपरक्ताभिरुपबृंहिताः समन्ताद् विजिगीषायां प्रवर्तन्ते ॥

**तेषां जनापवादभयादुपांशुदण्डः श्रेयान्** । स च यावदेव पितुरपत्यस्नेहो न जायते । जातस्नेहो हि कार्यमतिपातयेत् । **तन्नृशंसमिति** अतिक्रूरधर्मः । (अदृष्टवधः) अज्ञातदोषस्य उत्प्रेक्षया यो वधः । **क्षत्रबीजनाशश्च** अवश्यंभावी । सन्तानोच्छेदात् प्रजापराभवः स्यात् । **तस्मादेकस्थानावरोध** आत्मनो यत् स्थानं तस्मिन्नेवावरोधः अस्वतन्त्रीकरणं **श्रेयान्** ॥

अन्यैरसंसृज्यमानत्वा**दहिभयमेतदिति** । एकगृहनिवासिनः सर्पादिवद्भित्त्युद्वेगलक्षणं भयमेतत् । भयस्य हेतुमाह—**हि** यस्माद्, T.85. M.33. **विक्रमभयाद् भीतः पिता मां रुणद्धि** । न चास्य मयि जीवति भयमपैष्यति येनास्मिन् जीवति मुच्येयमिति ज्ञात्वा **कुमारः, तदेव** अस्य पितुः विक्रमभयम् । **अङ्के** समीपे वर्तमानः । **कुर्यात्** तदेव **चावरोधनं** पितुः **कुर्यात्** । ननु चावरुद्धोऽसौ तदेव करोतीति निश्चीयते अपरोऽन्यानुपगृह्य कुर्यादपीत्याशङ्क्य **तस्मादहिभयप्रतीकारार्थम्** । **अन्तपालदुर्गे वासः श्रेयानिति** । ततो न हि लक्ष्यत इति ॥

**औरभ्रं भयमेतदिति** । उरभ्रस्य मेषस्येदम् औरभ्रं भयम् । उपजापात् सहायवता अन्तपालेन प्रबलीकृतात्मशक्तेः राजपुत्रादुरभ्रादिव विस्रम्भान्महदापातभयं भवति तदेति दर्शयन्नाह **प्रत्यापत्तेर्हि** इति । यस्मादस्वातन्त्र्यनिवृत्तेस्तस्य **तदेव** पूर्वोक्तं विक्रमं **कारणं बुद्ध्वा** तदेव **चान्तपालोपग्रहणम्** । **अन्तपलस्य सखा स्यात्** । तस्य सखायम् आत्मानं निवेदयेत्—"तवेदं राज्यम्, अहं त्वदीय" इति । **तस्मादौरभ्रभयप्रतिषेधार्थम्** । **स्वविषयादपकृष्टे**

व्यवहिते । **सामन्तदुर्गे** राज्ञा अवस्थाप्यमानत्वात्, **मित्रदुर्गे वा उदासीनदुर्गे वा वासः श्रेयान्** । दूरतरादापततो मेषस्य शक्यप्रतिविधानत्वात् ॥

**वत्सस्थानमेतदिति** । वत्सप्रतारमेतदिति । तदेव प्रतारमाह— **वत्सेन हि** यथोपगृहीतेन स्नेहप्रस्नुतां **धेनुं** दोहको **दोग्धि, एवं** राजपुत्रोपगृहीतेन तत्तदुद्दिश्य **पितरमस्य सामन्तो दुह्यात्** । कोशदण्ड-भूमिभिः कर्शयेत् । **तस्मात्** तस्यात्मनश्च रक्षार्थं **मातृबन्धुषु वासः श्रेयान्** । ते ह्यस्य पितरं न दुह्युः ॥

**ध्वजस्थानमेतदिति** । ध्वजप्रतारमेव दर्शयन्नाह—**तेन हि ध्वजेन** निमित्त-भूतेन । T. 86. इदमस्य दौस्स्थित्यम्, अयं वो राजा भवितेति अनुकम्पां भयं वा प्रदर्श्य **अस्य मातृबान्धवा** अन्यान् **भिक्षेरन्** याचेरन् । दृष्टान्तमाह— **अदितिकौशिकवदिति** । यो देवताप्रतिमा(मादा)य भिक्षणं कुर्यादित्यदितिरुच्यते । कौशिकोऽहितुण्डिकः व्यालग्राहिक इत्यर्थः । तदुभयमपि देवतामहिश्च ध्वजीकृत्य (दा)नादानाभ्यां तत्प्रसादकोपा(वा)दिशन् लोकं भिक्षेत । **तस्माद् ग्राम्यसुखेषु** मृगयादिषु **एनमवसृजेत्** । तस्मात् संवर्धनेनाभ्युपायेन **रुद्धाः पुत्राः** पुन्नाम्नो नरकात् त्राणशीलाः **पितरं** पालयितारं **नाभिद्रुह्यन्ति** ॥

पित्रा कल्पितवृत्तित्वात् सत्यं नाभिद्रुह्यन्ति । किन्तु राज्यप्रतिसन्धाना-योग्यः । यदाह—**जीवन्मरणमेतदिति** । जीवतां मरणमिव । तदेव दर्शयन्नाह—**काष्ठमिव हीति** । यथा काष्ठं त्वगादिभिर्व्याप्यमानमपि **घुणजग्धं** क्रिमिभिर्निस्सारीकृतं गृहीतमात्रं भज्यते, तथा राजकुलमप्यविनीतपुत्रं तत्प्रकृतिभिः व्याप्तमपि कामादिभिर्निस्सारीकृतत्वात् पराभियोगसमकालं प्रकृतीनां निराश्रयत्वात् भज्येत । अनेनाभियोक्तुरल्पं व्यापारं दर्शयति । यतः,

"विवृद्धाश्चानुरक्ताश्च प्रकृतीर्हन्त्यनात्मवान्" (अधि. ६. अध्या. १)

इति । **तस्माद्** गर्भाधानात् प्रभृति संस्कारे यतितव्यम् । तथा चाहुः—

"आहारेष्वथ योनौ च बीजे कर्मणि चापि यः ।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्य धीः" ॥

इति । **ऋतुमत्यां** गर्भकालयोग्यायां **महिष्यां** सत्याम् । **ऋत्विजो** यज्ञकर्माधिकृताः । **चरुमैन्द्राबार्हस्पत्यम्** इन्द्रो बृहस्पतिश्च देवता यस्य तम् । **निर्वपेयुः** साधयेयुः । तं प्र(काश ? साध)यित्वा बीजमाधातव्यम् । अयं च (बी ? रा)जादीनां विधिः । अन्येषामवैदिकैर्मन्त्रैरौषधैश्च संस्कारो द्रष्टव्यः ।

आपन्नसत्त्वाया गृहीतगर्भायाः, कौमारभृत्यो बालतान्त्रिकः, कुमारस्य भृत्यं भरणं पोषणं तद्योगाच्छास्त्रमपि कुमारतन्त्रम् । "तदधीते" (४-२-५९) इत्यण् । सह स्व प्रक्रियया? गर्भभर्मणि रक्षणपोषणकर्मणि प्रसवे च प्रयतेत । प्रजातायाश्च प्रसूतायाः । पुत्रसंस्कारं जातकर्मादिकम् । पुरोहितः कुर्यात्, न ऋत्विजः । समर्थं विनययोग्यम् । तद्विदो विनयविदः, विनयेयुः ॥

T. 87. अत्र परमतमाह—सत्त्रिणामिति । कुमारमनुष्यव्यञ्जनानां सत्त्रिणाम्, एक एनं कुमारम् । मृगयाद्यूतमद्यस्त्रीभिः कामजव्यसनैः समस्तैर्व्यस्तैश्च पूर्वपक्षांकव्यायामादिगुणप्रदर्शनेन लोभयेत् । पितरि वा विक्रम्य विक्रमं कृत्वा राज्यं गृहाणेति स्वातन्त्र्यगुणख्यापनेन लोभयेत् । तं सत्त्रिणं लोभयितारं वा अन्यस्तदीयव्यञ्जनः सत्री स्तेनामित्रव्यालाद्युत्तरपक्षप्रदर्शनेन मृगयादिभ्यः त्रिवर्गविरोधेन पितृद्रोहात् प्रतिषेधयेत् । एवं विमृश्योभयतो निवृत्तो न पुनरात्मनः पितुर्वापचरति इत्याम्भीयाः अम्भेराचार्यस्य शिष्याः ॥

M. 34. अत्र दोषमाह—महादोषमिति । मृगयादिषु गुणानां सदोषाणां युद्धानां बोधनज्ञापनार्थं महादोषगुणरूपेण रथ्यमानस्य? दोषवत्त्वात् स्वर(स) प्रवृत्तस्य कालेन निवृत्तेः । यथोच्यते—

"दोषा दोषा इति ज्ञात्वा कालेनापि विरंस्यति ।
न तूपपत्तिर्विरते तद्गुणग्रहमानिनि" ॥

इति । तमन्यः प्रतिषेधयेदिति चेदाह—नवं हीति । द्रव्यं घटादिकम् । येन येनार्थजातेन घृतेन मद्येन वा उपदिह्यते श्लिष्यते तत्तदाचूषयति आपिबति । एवमयं नवमतिः अपरिणतबुद्धिः । स यद्यदुच्यतेऽहितं वा, तत्तच्छास्त्रोपदेशं शास्त्रविहितमुपदेशमिव आभिमुख्येन जानाति । तस्मात् करणीयवर्जनीयलक्षणं चतुर्वेदमस्योपदर्शयेत् । तत्र करणीयं द्विविधं धर्ममर्थञ्च गुरुप्रत्युत्थानादिकं देवतोपासनादिकं वा धर्मं यातव्यादानकृष्यादिकरणे वार्थम् । नाधर्ममनर्थञ्चेत्युभयं वर्जनीयम् । तत्र अनृतमगम्यागमनं वा अधर्मम् । (त? स)द्भिश्छेदं बलवद्विग्रहं वा अनर्थं नोपदिशेत् ॥

सत्त्रिणश्च कुमारपुरुषत्वेन राज्ञा नियुक्ताः विशेषदर्शनेन तव स्म इति असाधारणतां ब्रुवन्तो व्यसनात् पित्रपकाराच्चैनं रक्षेयुः । तदेवोदाहरणार्थमाह—यौवनोद्रेकादिति । यौवनोद्रेकात् कारणात् परस्त्रीषु मनः कुर्वाणम् । उपदेशादनिवर्तमानं बहिर्वस्त्रादिसंस्काराद् आर्यव्यञ्जनाभिरनार्याभिरित्यर्थोक्तम् ।

अमेध्याभिरकृतान्तश्शरीरसंस्काराभिः अनिष्टगन्धाभिः । शून्यागारेषु असंस्कारबीभत्सेषु । रात्राविति सङ्केतकालार्थम् । उद्वेजयेयुः यदनुभवान्न पुनः प्रवर्तेत । मद्यकामम् । नवमपि रोचनाय योगसहितेन पानेन उद्वेजयेयुः, अनुभवाद् विरज्येत । द्यूतकामं कापटिकैः निरवग्रहैः अशास्त्रवध्यैः संरोधवाक्पारुष्यखलीकारेणोद्वेजयेयुः । मृगयाकामं प्रतिरोधकव्यञ्जनैः चोरच्छद्मभिरुद्यतशस्त्रैः त्रासयेयुः । T. 88. पितरि विक्रमबुद्धिं राजानं हन्तुकामम्, बन्धुकामं वा । तथेति तदभिप्रायेण । अनुप्रविश्य भेदयेयुः जातशङ्कं कुर्युः ॥

भेदप्रकारमाह—अप्रार्थनीयोऽयमिति । सारक्षत्वाद् वधबन्धनार्थं प्रार्थयितुमशक्योऽयं राजेति । यद्यपि प्रेक्षादौ रक्षाशैथिल्यादारभ्येत तथापि नैकान्तिकी सिद्धिः । विपन्नेऽस्मिन् प्रयोगे घातः । न बलमस्माकं वास्ति । संपन्ने सिद्धे । ऐकान्तिको नरकपातः । शरीरजननवर्धनरक्षणैः पितुः परमोपकारित्वात् । संक्रोशः पितुर्द्रोग्धेति सर्वव्यवहारोच्छेदी परिवादः । प्रजाभिः तदनुरक्ताभिः । अस्माकम् एकलोष्टवधः एकैकेन लोष्ट........इत्येवं भेदयेयुः ॥

विरागं पितरि विगतस्नेहम् । प्रियम् आत्मनः प्रजानां वा । एकपुत्रं वेति । तथाच प्रियमेवमप्रियमप्येकं पुत्रं बध्नीयात् । एवञ्च सति नापकरोति शिष्यते च, न तु प्रवासयेत् प्रजापरागभयाद् व्यसनभयाद्वा । बहुपुत्रो राजा विरागमप्रियं प्रत्यन्तमनार्याधिष्ठितम् । अन्यविषयं वा अरिमित्रोदासीनमण्डलाद् बहिः प्रेषयेत् । यत्र प्रत्यन्तेऽन्यविषये वा । गर्भः पण्यं डिम्भो वा न भवेत् । गर्भ इव गर्भः, यत्रैनं पुत्रतया जामातृतया गर्भीकृत्य स्नेहात् प्रान्तिका अन्यवैषयिका वा न विकुर्वते । पण्यवत् पण्यम्, यत्रैनं प्रसार्य भिक्षया न शक्तिमात्मनः पूरयन्ति । डिम्भकारणत्वाद् डिम्भः, यत्र तदाश्रयात् कृत्यानुपगृह्य नोपद्रवं कुर्युः । आत्मसंपन्नमिति । आत्मसंपदा वक्ष्यमाणया युक्तः । तस्याधिकारित्वात् । सैनापत्ये सेनापतिकर्मणि चित्तपरीक्षार्थं स्थापयेत् । परीक्षितं वा क्रमेण यौवराज्य एव स्थापयेत् ॥

पुत्राश्च बुद्धिभेदात् त्रिविधा इत्याह—बुद्धिमानिति । एषां लक्षणमाह—शिष्यमाणाविति गुरुभिरुपदिश्यमानौ । धर्मार्थावुपलभते बुध्यते । अनुतिष्ठति च स्वयमारभते । बुद्धिमानिति प्रशंसायां मतुप् । न हि कस्यचिद् बुद्धिर्नास्तीति अयमात्मसंपन्न उच्यते । उपलभमानो नानुतिष्ठति आलस्याद् आहार्यबुद्धिः आचार्यैराहर्तव्या प्रतिक्षणमारोप्या बुद्धिर्यस्य तं प्रयत्नेन रक्षेत्, शिक्षयेच्च । अपाय-

नित्य इति । अपायेषु अपायकारणेषु कामादिषु नित्यः सन्निहितः । नित्यं षड्वर्गवशग इत्यर्थः । धर्मार्थद्वेषी नास्तिको मूलहरत्वादिदोषयुक्तश्च । दुर्बुद्धिः दुष्टबुद्धिः ॥

M. 35. T. 89. स यद्येकः पुत्रः तथाप्यस्य राज्यार्हत्वात् सन्तानानुच्छेदनार्थमस्य पुत्रोत्पत्तौ यथोक्तम् ऋत्विग्भिः प्रयतेत । बीजदोषाद्वा तदपत्यस्यापि दोषोत्प्रेक्षायां पुत्रिकाणां पुत्रकल्पानां दुहितॄणां ब्राह्मणैः क्षत्त्रियैर्वा पुत्त्रानुत्पादयेत् । ते ह्यौरसतुल्याः । तथा चोक्तम्—"तत्तुल्यः पुत्रिकापुत्रः" इति । वृद्धस्त्विति । यदा राजा वृद्धः लुप्तबीजः । व्यधितो वा महाव्याधिभिर्युक्तः । सन्तानराज्यानुसन्धानार्थं मातृबन्धूनामन्यतमेन मातृबन्धुना स्वकुल्येन वा पितृव्यपुत्रादिना धर्माविरोधात् । गुणवता सामन्तेन स्वक्षेत्रे नान्यपूर्वायां भार्यायाम् । बीजमुत्पादयेत् निषेचयेदित्यर्थः । यदि वा बीजमिव बीजं पुत्रं सन्तानहेतु.... । न चैकपुत्रमविनीतं राज्ये स्थापयेद्, अयोग्यत्वात् ॥

बहूनामित्यादि । बहूनान्तु विरागाणां प्रत्यन्तान्यविषयसंप्रेषणं विनापि । एकसंरोधः एकस्थानावरोधः स्यात्, मा भूदहिभयमिति । पिता पुत्रहितो भवेद् विनयाधानादिना । ते हि परस्परस्पर्धया प्राप्तगुणा उत्तरकालं राज्यप्राप्तियोग्या भवन्ति । तेषाञ्च राज्ययोग्यानां पित्रा अवरोप्यमाणं राज्यं ज्येष्ठभाग्येव धर्माविरोधात् पूज्यते । अस्य कनीयसां पालयितृत्वात् तैश्चानुवर्तमानत्वात् । तत्रापि अन्यत्रापद इति शरीरवैकल्यलक्षणामापदं त्यक्त्वा । तस्य अराज्यार्हत्वात् । अयं धर्मापेक्षया प्रथमो विधिः ॥

अर्थापेक्षया कुलस्य वा भवेद्राज्यमिति । सर्वेषां वा विभक्तं वा भवेद् राज्यमन्योन्यसंश्रयम् । (हि)यस्मात् परसंश्रयपरिजिहीर्षया । कुलसङ्घः अन्योन्यपरिगृहीतः । (नै ? परै)र्दुर्जयः । अराजव्यसनाबाधः अविद्यमानराजव्यसनः, अविद्यमानपराबाधश्च । शश्वदविच्छेदेन । आवसति क्षितिम् अधितिष्ठतीत्यर्थः । "उपान्वध्याङ्वसः" (१.४.४८) इति अधिकरणे कर्मसंज्ञा । तथा चाहुः—

"महानप्येकजो वृक्षो बलवान् सुप्रतिष्ठितः ।
विषह्य एव(वा)तस्य शाखाः स्कन्धञ्च मर्दितुम् ॥
अथ ये बहवो वृक्षाः संहताः सुप्रतिष्ठिताः ।
तेन शीघ्रतरान् वातान् सहन्तेऽन्योन्यसंश्रयाः" ॥ इति ॥

इति राजपुत्ररक्षणं त्रयोदशं प्रकरणम् ।

सप्तदशश्चाध्यायः ॥

## अथ अष्टादशोऽध्यायः

T. 90. एवमन्यायवृत्तेभ्यः पुत्रेभ्यः पृथिवीविजिगीषो रक्षणमुक्तम्। राजपुत्रावस्थायामन्यायवृत्तिना पित्रा अवरुद्धो निराकृतः। अवपूर्वो रुधिर्निराकरणे वर्तते। निराचिकीर्षितो वा। सोऽस्यर्थादवरुद्ध इति। तस्य राज्यप्राप्तये चरितमवरुद्धवृत्तमुच्यते। तेन राजवृत्त्यधिकारेऽपि राज्ञोऽवस्थाभेदाद् भेद इत्येवमुच्यते। यथा—

"पार्ष्णिग्राहोऽभियोक्ता वा यातव्यो वा यदा भवेत्।
विजिगीषुस्तदा तत्र नैत्रमेतत् समाचरेत्॥" (अधि. ७. अध्या. १३)।

तथा—

राजा वा राजपुत्रो वा विजिगीषुर्यदा भवेत्।
पुत्रे पितरि वा दुष्टे स तदैवं समाचरेत्॥

इत्यर्थापन्नम्। तत्र निराचिकीर्षितमधिकृत्याह—**राजपुत्र** इत्यादि। **कृच्छ्रवृत्तिः** कथं नाम दूरमपयास्यतीति पित्रा कल्पितवृत्तित्वाद् दूरस्थः। अवश्यश्चेदं कर्तुमिच्छतीति **असदृशेऽननुरूपे कर्मणि नियुक्तः पितरमनुवर्तेत**। आनुकूल्येनाराधयितुं तत्कर्म कुर्यादित्यर्थः। **अन्यत्रेति** प्राणाबाधकादिनियोगादन्यत्र। प्राणाबाधकादीनि तु न कुर्यात्। **प्राणाबाधकं** कर्म यदसाध्ये दण्डधारित्वादि। तत्रैकान्तिको विनाशः। **प्रकृतिप्रकोपनं** विरागजनकदण्डकरसाधनादि। **पातकं** धर्मलोकव्यवहारविरोधि। **पुण्ये** धर्माविरुद्धे समाहर्त्रादिकर्मणि परीक्षार्थं फलोत्पादनार्थं वा नियुक्तः। **पुरुषं** पुरुषगुणोपेतम् **अधिष्ठातारं** कर्मसाक्षिणं दोषपरिहारार्थं **याचेत** मार्गेत पितरमित्यर्थात्। तेनाधिष्ठितश्च परिज्ञातपूर्वाधिष्ठितः **सविशेषं** विकल्पोत्थापनैः प्राचुर्येण शीघ्रतया वा। **आदेशम्** आदिश्यत इत्यादेशमनुतिष्ठेत्। **अभिरूपं चेति** अभिरूपं समर्थं **कर्मफलम्**। **औपायनिकश्च लाभं** जनपदेन दिदृक्षुणा उपायनार्थमाहृतं शौचख्यापनार्थम् **उपनाययेत्**, न तु स्वयमुपनयेत् परोक्षं तुष्टातुष्टत्वं प्रकाशयिष्यतीति। तत्र प्रमाणैस्तुष्टमुपलभ्य सविशेषमनुवर्तेतेति सामर्थ्यलब्धम्॥

**तथापि** व्यावृत्तौ स्वभावतो दोषादेव वा **अतुष्यन्तम्**। **अन्यस्मिन् पुत्रे दारेषु वेति**। अन्यस्मिन्ननुवर्तमानेषु पुत्रदारेषु वान्येषु तन्मातृसपत्न्यां प्रतिपक्षभूतायां स्वभावादेव **स्निह्यमानम्**। ताच्छील्ये (चानश्)। प्रव्रज्यानिमित्तं

वैराग्यं ख्यापयन् अरण्यायापृच्छेत। तपोवनं गन्तुमापृच्छेत। "क्रियार्थोपपदस्य" (१-३-१८) इत्यादिना चतुर्थी। अथैवमपि नानुकम्पेत, किन्तु तदपेक्षामाहन्याद् बध्नीयाद् वेति मन्येत, तदा वधबन्धभयाद्वा सामन्तमाश्रयेत इति निराकृतस्य वृत्तमाह। कीदृशमित्याह—यः सामन्त इति। न्यायवृत्तिः स्वल्पेनापि यत्नेन तन्त्रसाधनसमर्थः। धार्मिकः न चैनं पण्यं करोति। M. 36. सत्यवाग् यथावृत्तिज्ञानकारी। अविसंवादकः न वाक्छलेनातिसन्धत्ते। अभिपन्नानां शरणागतानां प्रतिग्रहीता संग्रहीता मानयिता पूजयिता तमाश्रयेत। T. 91. तत्रस्थ इति तमाश्रितः। कोशदण्डसंपन्नः सन्। तेन बीजभूतेन प्रवीरपुरुषाणां पित्र्याणामन्येषां वा याः कन्याः ताभिर्वरणेन सम्बन्धं शक्तिपूरणार्थम्। अटवीसंबन्धम् आटविकैः सह संबन्धमनेकप्रकारम्। पितुर्यः कृत्यपक्षः तस्य उपग्रहं यथोक्तं कुर्यात्।

यस्तु कोशदण्डरहितत्वाद् एक एव चरति विजिगीषायां स एकचरः। तदाश्रय एव कोशार्थं सुवर्णपाकादीन् कुर्यात्........(आ)जीवेदनुतिष्ठेत्। तत्र सुवर्णस्य वर्णोत्कर्षार्थं पाकः सुवर्णपाकः। स्फटिकस्य जात्यन्तरगुणाधानार्थं रञ्जनं मणिरागः। सरःपारा(?) संस्कृतः हेमादिकृत्। रूप्यमाहत-कर्मनिष्पाद्यम्। पण्यं पणितव्यं वणिक्कर्मणा। आकरकर्मान्तो धातुवाद-विधिरिति। पश्चाद्धर्ममाचरिष्यामीति आपत्कल्पमाह पाषण्डेति। पाषण्डानां शूद्रप्रव्रजितानां प्रत्येकं यद् द्रव्यं वर्णधर्मानुपयोगित्वात्....धानां पाषण्डानामन्येषां वा यत्साधारणत्वादपीडाकरम्। देवद्रव्यम् अश्रोत्रियैर्वृषलपरिव्राजकैर्यद् भुज्यते तदल्पदोषत्वादपहरेत्। आढ्या या विधवा तां वा गूढं प्रच्छन्नम् अनुप्रविश्य कामित्वेन द्रव्यमपहरेदिति संबन्धः। पूर्वत्र शिष्यादिभावेन गूढानुप्रवेशो ज्ञेयः। सार्थानां यानं नौशकटबलीवर्दादि द्रव्यम्। प्रभूतानि पात्राण्यश्वाश्वतरहस्त्यादीन्यपहरेत्। मदनरसयोगेन सार्थपतीननुप्रविश्य। पारग्रामिकश्चेति परदुर्गग्रहणाय यो योगः प्रभवति दुर्गलाभोपायविहितः तमुपजापादिकमातिष्ठेत् स्वराज्यप्राप्त्यर्थम्। मातुः संबन्धी यः परिजनस्त-स्यासाधारणत्वाद्दानमानाभ्यामुपग्रहः स्वीकरणं तेनोपायभूतेन चेष्टेत यथास्य यौवराज्यमुपततो दद्यात्। T. 92. कार्वादिच्छद्मभिर्वेति। कारुर्वर्धक्यादि। शिल्पी आलेख्यलेख्यादिकुशलः। कुशीलवो नृत्तगीतादिजीवनः। चिकित्सको वैद्यः। वाग्जीवनः कथकवाचकादिः। पाषण्डः पाशुपतादिः, तच्छद्मभिस्तद्व्यञ्जनैः सह। तद्व्यञ्जनसखः कार्वादिव्यञ्जनानां सखा

भूत्वा। तत्रापि **नष्टरूपः** प्रच्छादितपूर्वरूपः "वरकषायस्नातः सहचरकल्कदिग्धः कृष्णो भवति" (अधि. १४. अध्या. २) इत्येवंप्रकारैर्योगैः **राज्ञः छिद्रेषु** रक्षाशैथिल्येषु प्रेक्षादिषु **अनुप्रविश्य शस्त्ररसाभ्यां प्रहृत्य,** कानित्यर्थात् पितृपक्षीयान् पितुः पक्षच्छेदं कृत्वा न तु पितरं लोकधर्मविरोधात् पितृघातकोऽयमिति। मध्यस्थेषु **ब्रूयात् अहमसौ कुमारो** यो निराकृतः। पौरामित्रशङ्कानिवृत्त्यर्थम्। **सहभोग्यमिदं राज्यं** पितुः पुत्राणाञ्च। **एको** रागद्वेषाभ्यां **नार्हति भोक्तुम्।** अतो मयैवं कृतमिति। इदञ्च **ब्रूयात्—ये** युष्माकं मध्ये **कामयन्ते** इच्छन्ति मां स्वामिनमिति, अर्थादहं **भोक्तुं** पोषयितुम्। **द्विगुणेन भक्तवेतनेनोपस्थास्य इति** सेविष्ये। **इति** एवंप्रकारम् **अवरुद्धवृत्तम्॥**

**चतुर्दशं प्रकरणम्॥**

**अथ पञ्चदशं प्रकरणम्**

यदि न्यायवृत्तिर्विपरीतो वावरुद्धोऽपाकुर्यात् तदा तस्मिन् राज्ञः का वृ(त्तिर्भव)तीत्यवरुद्धे वृत्तिरुच्यते। यदाह—**अवरुद्धमिति।** प्रत्यन्तमन्यविषयं वोपद्रवपरिहारार्थं प्रेषितं वधबन्धभयाद्वापक्रान्तं पितुरनुतापे वा सति। **मुख्यपुत्रापसर्पा इति।** मुख्यानां मन्त्र्यादीनां पुत्रा अपसर्पत्वेन नियुक्ताः सहक्रीडितत्वादिभिर्विश्वास्याः। **प्रतिपाद्य** प्रत्याय्य सत्यशपथादिभिस्तेषां पितॄणां प्रातिभाव्येन (अचलन? लग्नक) त्वेनानयेयुः। **माता वा कुमारस्य प्रतिगृहीता** .........त्रा प्रतिपाद्यानये(युः? त्)। दुर्वृत्तत्वात् **त्यक्तमसन्धेयं गूढपुरुषाः** आत्मनः प्रजानां च क्षेमार्थं राज्ञा प्रयुक्ताः **शस्त्ररसाभ्यां हन्युः,** विकलीकुर्युः। **अत्यक्तं** शङ्कयापक्रमम्। **तुल्यशीलाभिः** एकशीलाभिः अभेदार्थम्। **स्त्रीभिः** सार्धं **पानेन प्रसज्य** संयोज्य। उद्यानादिषु विहरन्तः। **मृगयया वा** प्रसज्य तुल्यशीलैः राजपुत्रैरित्यर्थोक्तम्। **रात्रावदृष्टदिग्भागम् उपगृह्य** प्रलोभ्य आनयेयुः, गूढपुरुषा एव। T. 93. M. 37.

उपस्थितमित्यादिः श्लोकः। **उपस्थितं** स्वयमागतं वा कल्याणबुद्धिम्। **राज्येन सान्त्वयेत्** मदूर्ध्वं तवेदं राज्यमिति। **मध्यबुद्धिमेकस्थ**.........धं कुर्यात्, यथा न विक्रमेत, अपायनित्यं तु पुरक्रीडाम्(?)* ॥

**(इत्यवरुद्धवृत्तम् अवरुद्धे च वृत्तिः, चतुर्दशं पञ्चदशञ्च प्रकरणे। अष्टादशश्चाध्यायः॥)**

---

* इतः परमनन्तराध्यायोपक्रमावधिर्ग्रन्थभागो मातृकायां लुप्तः।

## अथैकोनविंशोऽध्यायः

T. 95. M. 38....(षष्ठे स्वैरविहारं) मन्त्रं वा सेवेत । स्वैरविहारमित्युक्त्या उदाहरणत्वात् कार्यान्तरवेलायामपि प्रत्युत्पन्नं मन्त्रं गौरवान्नातिपातयेदिति द्रष्टव्यम् । वाशब्दो विकल्पार्थः, सप्तमेऽपि रात्रिभागेऽस्य सावकाशत्वात् । सप्तमे हस्त्यश्वरथायुधीयान् स्नातपीतभुक्तत्वात् सुमनसः पश्येत् । तज्जीविनाञ्च यथास्वं विद्याविनयं चेत्यर्थोक्तम् । दृष्टसेनाङ्गश्च अष्टमे सेनापतिसखः । तदायत्तत्वाद् विक्रमस्य, विक्रमं सैन्यमूलं शक्यमशक्यं वा चिन्तयेत् । प्रतिष्ठितेऽहनि परिसमाप्ते सन्ध्यामुपासीत वन्देत । तस्मात्...र्तोचारत्वात् । अयञ्च कालः अहोरात्रान्तर्भूतो द्रष्टव्यः ॥

प्रथमे रात्रिभागे अप्रकाशरूपत्वात् पञ्चमाहर्भागदृष्टशेषान् गूढपुरुषान् कापटिकादीन् पश्येत् । द्वितीये स्नानम् अङ्गप्रक्षालनं सति घर्मादौ तदपनोदनार्थं सुखशय्यार्थं च । भोजनं च सत्यां बुभुक्षायां बलाधानार्थं च सेवेत । यदाहुः —

"अजीर्णे भुज्यते यच्च यच्च जीर्णे न भुज्यते ।
रात्रौ न जीर्यते यच्च तेन जी(व? र्य)न्ति मानवाः ॥"

इति । अत्र च सायं प्रातर्भोजन इति श्रुतावपि सत्यामयं कालविशेषनियमः । स्वाध्यायं च परलोकाङ्गसिद्धान्तानुस्मरणं कुर्वीत । तृतीये तूर्यघोषेण शयनस्थितिसूचकेन तत्सुखमासेवमानः । संविष्टः शयनमधिरूढः । तच्छेषेण सह चतुर्थपञ्चमौ भागौ शयीत धातुसाम्यार्थम् । तत्रापि कार्यवशादतिप्रसज्यमानः । अत्यन्तसंयोगे द्वितीया । षष्ठे तूर्यघोषेण प्रातिबोधिकेन प्रतिबुद्धः, तदानीं प्रसन्नचित्तः शास्त्रं यदभ्यस्तमनभ्यस्तं वा, इतिकर्तव्यतां चेति एवं करणीयमिति । शास्त्रबाह्यमिति सहाध्यायिभयादन्यथाविकल्पयन्.... चिन्तयेत् । सप्तमे मन्त्रमध्यासीतेति । षष्ठेऽहर्भागे स्वैरविहारेण विकल्पितमपूर्वं नवं वा मन्त्रं सेवेत । एक एव, न मन्त्रिभिः सार्धम्, तदानीं स्मृतिसंभवात् । मन्त्रनिश्चयानन्तरं च गूढपुरुषान् प्रेषयेत् । उक्तं च "उद्धृतमन्त्रो गूढ? दू-)प्रणिधिः" इति । अष्टमे सङ्कीर्णाव्यवहारिसमाहर्तृनागरिकादिदर्शनात् प्राग् असङ्कीर्णाचारेभ्यः ऋत्विगाचार्यपुरोहितेभ्यः

स्वस्त्ययनमाशीर्वादं वैदिकं लौकिकं च प्रतिगृह्णीयात् । दुःस्वप्नाद्यपनोदनार्थं मङ्गलार्थं च । तदानीम् ऋत्विजोऽग्निहवनार्थं विशन्ति, आचार्याः शास्त्रार्थसन्देहापनोदनार्थम्, पुरोहितश्च मन्त्राभिमन्त्रणाज्य(क ? द)र्शनकपिलादानार्थं प्रविशति । अन्ये ऋत्विगाचार्यपुरोहितस्वस्त्ययनादीनीति समस्य पठन्ति । चिकित्सकादीन् प्रविष्टांश्च पश्येत् । तत्र चिकित्सकं स्वस्थास्वस्थभेषजार्थम् । ऋत्विगनुकूलभोजनकल्पनार्थं च माहानसिकान् महानसनियुक्तान् सूदतदध्यक्षान् वैद्योपदिष्टसंपादनार्थम् । मौहूर्तिकान् शान्त्यादिकर्मादि... दिवसचारनक्षत्रज्ञानार्थम् । मुखप्रक्षालनानन्तरं चेदमिति सार्वलौकिकम् । अवसितायां रात्रौ सन्ध्यामुपासीतेति पूर्वोक्ता....हि । अन्ततो धेनुं पृथिवीकल्पां सवत्सां प्रस्नुतां वृषभं च धर्मस्थानीयमुभयं च मङ्गल्यतमम् ।

सर्वं कार्यं तदा स्वशक्त्यनुरोधेन निशाहर्भागान् विभज्य सर्वाणि कार्याणि सेवेतेति ॥

T. 96. एवमहोरात्रप्रणिहितः उपस्थानगतः कार्यार्थिनामर्थिप्रत्यर्थिनां द्वारमसङ्गमप्रावृतं कारयेत् । यस्माद् दुर्दर्शो राजा कार्यार्थिभिः दुःखेन दृश्यते । ततश्च कार्यविपर्यासं दण्ड्यस्याप्यदण्डनम्, अकार्यविपर्यासमदण्ड्यस्यापि दण्डनम्, इच्छाद्वेषानुविधायिभिः आसन्नैः अन्तिकचरैः मन्त्र्यादिभिः राजा कार्यते । M. 39. तेन कार्याकार्यविपर्यसनेन विरक्तानां प्रकृतीनां कोपं गच्छेत् प्राप्नुयात् । अरिवशं वा । यथा वक्ष्यति—

"हन्यते वा प्रकृतिभिर्याति वा द्विषतां वशम् ।" (अधि. ६ अध्या. १)

इति । यतश्चैवं तस्माद् देवतानां देवसंभोगानाम् । आश्रमोपलक्षितानामाश्रमिणामित्यर्थः । पाषण्डानामाश्रमबाह्यानां पाशुपताद्याजीवकानाम् । श्रोत्रियाणां छन्दोऽध्यायिनाम् । पशूनां तदुपलक्षितानां तत्पालकानाम् । पुण्यस्थानानां तीर्थमठागारादीनां धर्मगरीयस्त्वात् पूर्वम् । ततो बालानामप्राप्तव्यवहाराणाम् । वृद्धानां लुप्तव्यवहाराणां (यात)यामानाम् । व्याधितानां कुष्ठ्यादीनाम् । व्यसनिनां ? (व्यङ्गानां) विकलाङ्गानाम् । अनाथानामनाश्रयाणामनुकम्पनीयत्वात् । स्त्रीणां सनाथानामपि तत्प्रकाश्यत्वात् । क्रमेण यतिनोकरणमिति (?) ॥

तदेवोक्तमनुक्तं च श्लोकैर्दर्शयन्नाह—**सर्वमिति** । यथाविहितं कालं कार्यान्तरमपास्य सर्वं गुरुलाघवकार्यं **शृणुयात् नातिपातयेत्** । तदात्वे प्रतिकुर्यात्....यामुपेक्षितो धातून् व्याप्नुवन् **कृच्छ्रसाध्यो** भवति । कालान्तरे वा स्थैर्यमापन्नोऽसाध्य एव ॥

**अग्न्यगारगत** इति साक्षिप्रश्नार्थमुपनयन्ति । निहितकाग्निप्रवेशगतः **कार्यं पश्येत्** । **वैद्यतपस्विनां** विद्यामधीतवतां विदुषां तपस्विनाम् [ तदधीते तद्वेद (४. २. ५९.)] इत्यण् । ते हि विद्वत्तया नाविमृश्य कुर्वन्ति । तत्रापि विनय(स्त्वनाति ? नियमादि)रक्षार्थं **पुरोहिताचार्यसखो** भूत्वा । **प्रत्युत्थाय** आदरख्यापनार्थं प्रत्युद्गमनं कृत्वा । **अभिवाद्य च** धर्माचारानुवृत्त्यर्थम् ॥

**तपस्विनां च** (वैद्यानां? **कार्याणि**) पारिशेष्यात् **त्रैविद्यैः** धर्मस्थैः प्रदेष्टृभिरपरैश्च विद्वद्ब्राह्मणैः **सह कारयेत्** । तपस्विनां तैस्तैः शाम्यतीति । **माया-विदामैन्द्रजालिकानाम् । योगविदां** मन्त्रौषधयोगैरर्थान् विकुर्वतां **तैरेव कारयेत् । न स्वयं कुर्यात्** । **कोपकारणात्** क्रोधकारणात् । कदाचिद् वैद्यास्तपस्विनोऽवसन्नव्यवहाराः क्रोधेनापि शपन्ति । मायायोगैश्च तद्विदो वञ्चयन्ते ॥

T. 97. उत्थानस्य दृढीकरणार्थमाह—**राज्ञो हीति** । **उत्थानं व्रतम्** । अव्रतिनो यज्ञेऽनधिकारात् । **यज्ञः कार्यानुशासनम्** । कार्याणामाभि-मुख्येनानुशासनं व्रत्युत्थानव्रते यज्ञः कार्यानुशासनमधिक्रियते । यज्ञे द्रव्यादि-विसर्गो **दक्षिणा** । इह तु **वृत्तिसाम्यम्** । सर्वेभ्यो वृत्तेः समतां निग्रहानुग्रहयोरपक्षपातितां ददाति । **दीक्षा तस्य** राजार्थं **यदभिषेचनम्** । तदा प्रभृत्ययं कार्यानुशासनं यज्ञं प्रत्यधिक्रियते ॥

तस्य च कार्यानुशासनयज्ञस्य दृष्टादृष्टं फलमित्याह—**प्रजासुख** इति । कण्टकशोधनादिकर्मानुष्ठानैः प्रजानां सुखोपभोगे सति **सुखं राज्ञः** उपभोगपर्याप्तस्य कोशादेर्लाभः । वक्ष्यति—"कोशो दण्डः विष्टिः कुप्यं वाहनं निचयाश्च जनपदादुत्तिष्ठन्ते" (अधि. ५. अध्या. १) इति । एतद् दृष्टं फलम् । **प्रजानां च हिते** स्वधर्मस्थापने सति **हितं राज्ञो** धर्मांशलाभः धर्मस्यांशभाङ्नृप इति वचनात् । इत्यदृष्टं फलम् । ननु च राज्ञ एव यत् प्रियं सुखं मृगयाद्यनुष्ठानं हितं च देवयागादि तदपि प्रजानां प्रियं हितं कस्मान्न भवतीत्याह—**नात्मनि प्रियं हितं राज्ञः । प्रजानां हि प्रियं हितं** प्रजानामाप्तकारित्वात् । प्रजाप्रियहितयोस्तु राजोपकारित्वात् ॥

यथोक्तं निगमयन्नाह—तस्मादिति । नित्योत्थितो नित्योद्युक्तः । अर्थानुशासनं प्रयोजनानां सर्वेषामनुष्ठानम् । अर्थस्य प्रजाया आत्मनश्चार्थस्य मूलं प्रधानकारणम् उत्थानम् । विपर्ययस्त्वनु(ष्ठा? त्था)नं न केवलमर्थस्य न मूलं किं तर्ह्यनर्थस्यापि मूलम् ॥

अस्यैव प्रपञ्चमाह—अनुत्थान इति । भूतपूर्वस्यानवस्य पित्र्यस्य वा लाभस्य प्राप्तस्य ध्रुवो नाशः । अनागतस्य प्राप्तिमार्गागतस्य व्यपगमनं नाशः । उत्थानेऽपि किं लाभ एव उतालाभोऽपि कदाचिदिति नियमार्थमाह—पूर्वमप्राप्तं प्राप्यत एव ध्रुवं फलमुत्थानात् । अर्थसंपदं प्राप्तस्यार्थस्य संपदं विधिं गुणाधानं वा लभते राजेत्यर्थात् ॥

राजप्रणिधिः षोडशं प्रकरणम् ।

एकोनविंशोऽध्यायः ॥

## अथ विंशोऽध्यायः

T. 98. M. 40. रक्षितो राजेत्यतः प्रभृति राजरक्षणं प्रकृतम् । तद्विशेषा राजपुत्ररक्षणादयः । तत्र चोक्तम्—"दाररक्षणं निशान्तप्रणिधौ वक्ष्यामः" इति । अनन्तरं चोक्तम्—"अनुत्थाने ध्रुवो नाशः" इति । तत्परिहारार्थं निशान्तप्रणिधिरुच्यत इति प्रकरणसंबन्धः । निशान्तं गृहं तत्र प्रणिधानं व्यापार इति निशान्तप्रणिधिः ॥

तत्र निशान्तस्यैव संस्कारमाह—वास्तुक इति । वास्तु गृहम् । "अगारे णिच्च" (उणादि. ७६) इति वचनात् । तत्साहचर्याद् विद्यापि वास्तु, तदधीतवन्तो वास्तुकाः । उक्थादिदर्शनात् "इसुसुक्तान्तात्कः" (७-३-५१) । तैः प्रशस्ते देशे पूजिते । तद्यथा—अरत्निमात्रं खानयित्वा तत्पांसुभिः (पूरिते) तदाधिक्ये प्रशस्तं तद्धानावप्रशस्तं समे सममित्यादिना । सप्राकारं सपरिखं सद्वारम् । अनेककक्ष्याभिरनेकप्रकोष्ठैर्वक्ष्यमाणनिवेशापेक्षया चतसृभिः परिक्षिप्तम् । तदेवमुभयतः परिक्षेपाद्राजकीयकक्ष्यया सह सप्तकक्ष्यमन्तःपुरं राजवासकं कारयेत् ।

तस्यान्तःपुरस्य मध्ये राजकीयकक्ष्यायां कोशगृहविधानेनेति । "चतुरश्रां वापीं निरुदकस्नेहां खानयित्वा" (अधि. २. अध्या. ५.) इत्यादिना

अध्यक्षोक्तविधानेन वा । गृहमेवं हि गूढाः स्त्रियः सर्परसाग्निधूमैर्नैवाति-सन्दध्युः । गूढभित्तिसञ्चारं मोहनगृहं गूढो भित्तिषु सञ्चारो यस्यान्तः । उभयतो (भक्ति? भित्ति)रेवोपलक्ष्यते न सञ्चारः । तदागन्तुकमोहनार्थत्वान्मोहनगृहम् । तन्मध्ये वा वासगृहं कारयेत् । किञ्च भूमिगृहं कारयेत् । कीदृशमित्याह— आसन्नं सौकर्यार्थं यच्चैत्यम् इष्टकासमूहः तत्र या काष्ठदेवता काष्ठमयी यक्षादिप्रतिकृतिः सैवापिधानमावरणं यस्य द्वारस्य तदासन्नचैत्यकाष्ठदेवता-पिधानं द्वारं यस्य भूमिगृहस्य ॥

अन्यस्त्वाह—आसन्नं चैत्यादि प्रत्येकमपिधानम् यस्य द्वारस्येति । तत्र काष्ठं (प्रेत्य ख्यातो वनस्पति?) देवता शिलाकाष्ठमयी प्रतिकृतिरिति । अनेकया सुरुङ्गया सञ्चारो यस्मिन् । वक्ष्यति च—"सुरुङ्गया रात्रौ राजवासगृहमनुप्रविश्य सुप्तममित्रं हन्यात्" (अधि. १२. अध्या. ५.) इति । प्रासादं वा तलबद्धं प्रकाशगृहगूढभित्त्यावन्तर्गतं सोपानं यस्य । सुषिरैश्च स्तम्भैः प्रवेशापसारौ प्रवेशनिर्गमौ यत्र । T. 99. यन्त्रबद्धतलावपातमिति । यन्त्रेण बद्धस्य तलस्यावपतनं यस्मिन् प्रासाद इति । यथा वक्ष्यति—"शूलकूटावपातं वा शयनासनस्याधस्ताद् यन्त्रबद्धतलम् एककीलमोक्षणेन प्रवेशयेत्" (अधि. १२. अध्या. ५.) इति । (पर) व्यापारस्य अभिघातार्थं कारयेत् । आपदि वा कारयेत् । चिरकृतस्य मन्त्रभेदो मा भूदिति । अतोऽन्यथा वेति उक्तादन्यथा वा स्वबुद्ध्या विकल्पयेत् सहाध्यायिभयात् । यथाविहितानुष्ठानपरैरप्येतच्छास्त्रविद्भिर्विज्ञेयत्वात् ॥

निशान्तस्य रक्षार्थमाह—मानुषेणेति मनुष्यभवेन (अग्निना) । वक्ष्यति— "शस्त्रहतस्य शूलप्रोतस्य वा पुरुषस्य वामपार्श्वपर्शुकास्थनि कल्माषवेणुना निर्मथितोऽग्निः" (अधि. १४. अध्या. २.) इत्यनेन । त्रिरपसव्यं प्रादक्षिण्येन त्रीन् वारं परिगतं नीराजितम् अन्तःपुरमग्निरन्यो न दहति । स एव दह्येत । यथा वक्ष्यति—"मानुषेणाग्निना परदुर्गमादीपयेत्" (अधि. १३. अध्या. ४.) इति । न चात्र अन्योऽग्निर्ज्वलति । प्रदीपस्तु स्वविषये वर्तौ ज्वलति, न पुनस्थस्वेऽस्मिन्नपीडने (?) दहतीत्यनेनैव गतमिति चेत् प्रकर्षख्यापनार्थं वचनम् । अन्योऽपि वैद्युतोऽग्निर्नास्मिन् प्रभवतीति । वैद्युतेनेति वैद्युतोऽग्निस्तज्जेन भस्मना मृत्संयुक्तेन अवलिप्तं च । अन्योऽग्निर्मानुषो दिव्यो वा न दहतीति वर्तते ।

विषप्रतीकारार्थमाह—जीवन्ती शाकविशेषः । श्वेता गिरिकर्णिका । मुष्कको वृक्षः । तेषां यथायोग्यं पुष्पप्रवाळानि वन्दाकाश्च । ताभिः

गृहीताभिः । अक्षीबे अच्छुप्के (?) जातस्य अश्वत्थस्य **प्रतानेन** आरोहेण निकारणादि ? सन्निधानमात्रेणैव **गुप्तं** रक्षितम् **अन्तःपुरं विषाणि न प्रसहन्ते** नाभिभवन्ति । तत्प्रभावावनतवीर्यत्वात् । **मयूरनकुलपृषतोत्सर्गेति** । आकाशविवरभूमिगतानां सर्पाणां भक्षणार्थम् उत्सृष्टव्या नावरोद्धव्या मयूरादयः । ततश्च तेषामेव रक्षणमुत्सर्गस्योपचर्यते । T. 100. **शुकः शारिका भृङ्गराजः** पक्षिविशेषः **सर्पविषशङ्कायां** बन्धमसहमानाः **क्रोशन्ति** । बद्धा उत्सृष्टाश्च । **क्रौञ्चो विषाभ्याशे** स्पर्शनदर्शनाघ्राणाच्च **माद्यति** विह्वलीभवति । M. 41. **ग्लायति जीवञ्जीवकः** दीनतां भजते । **म्रियते मत्तकोकिलः न जीवति । चकोरस्याक्षिणी** स्वभावतो रक्ते **विरज्येते** शुक्लतां प्रतिपद्येते । **एवम्** उक्तेन प्रकारेण **अग्निविषसर्पेभ्यः प्रतिकुर्वीत** प्रतीकारं कुर्यात् ॥

इदानीमन्तःपुरसन्निवेशमाह—**पृष्ठत** इति । वासगृहाद्बहिः त्रिकक्ष्यापरिक्षिप्तेऽन्तःपुरे प्रत्येकं कक्ष्याणां पुरः पृष्ठतः पार्श्वतश्च परिखादिभिर्विभक्तानां योऽनन्तरः पृष्ठतः कक्ष्याविभागः उभयपार्श्वार्धभागयुक्तः तत्र **स्त्रीणां** राज्ञीनां स्वगृहात् प्रत्यासन्नः । द्वितीये कक्ष्याविभागे **गर्भव्याधिस्थाः** गर्भिण्यो व्याधिताः स्त्रियो गर्भव्याधयः तासां **संस्थानं** संस्थितिः । ततः तृतीये कक्ष्याविभागे **वृक्षोदकस्थानम्** उद्यानवापीस्थानम् । पृष्ठतः कक्ष्यात्रयेषु उभयपार्श्वार्धसहितेषु निवेश उक्तः । **पुरस्तादाह—बहिरिति** । राजप्रकोष्ठाद्बहिः पुरस्तादग्रतः द्वितीये कक्ष्याविभागे उभयपार्श्वार्धयुक्ते निर्गमनमार्गं त्यक्त्वा **कन्याकुमाराणाम्** अप्राप्तव्यवहाराणां शयनाध्ययनव्यापारस्थानम् । **अध्यक्षाणां** समाहर्त्रादीनाम् अधिकरणस्थानम् । सर्वत्र दुर्गविधानादिप्रोक्तं प्रमाणादिग्विभागाद्यपेक्षम् । कक्ष्यान्तरेषु यथोक्तगृहानध्यासितेषु **अन्तर्वंशिकानाम्** अन्तःपुरकक्ष्यानियुक्तानां **सैन्यं तिष्ठेत्** ॥

T. 101. इदानीं प्रणिधानमाह—**अन्तर्गृहगत** इति । **स्वगृहगतः स्थविरस्त्रीभिः** धात्रेयिकादिभिः वयसा विनयेन चाधिकाभिः **परिशुद्धां** कृतवस्त्रालंकारशरीरशौचां **देवीं** राज्ञीम् । **पश्येदिति** दर्शनेऽपि प्रतिक्रिया, किं पुनः अभिगमन इति । न तु स्वगृहावस्थितां **काञ्चिद् अभिगच्छेद्** दोषपरिहारार्थम् ॥

तद्गृहगमनाद् अशोधनाच्च दोषमाह—**देवीगृह** इति । यस्माद् **देवीगृहै**कदेशे तया कृतसंजल्पः, आत्मानं प्रच्छाद्य स्थितः, रक्षाशैथिल्याद् उपेक्षितप्रवेशनिष्कासं **कलिङ्गराजं भद्रसेनं** तद्भ्राता राज्यापहारार्थं **वीरसेनो जघान** ॥

मातुः शय्यान्तर्गतश्चेति । शय्याया अधो लीनः पुत्रः राज्यार्थम् अन्यस्मिन् पुत्रे स्निह्यन्तं कारूशं करूशेषु राजानं देवीगृहगतं जघानेति वर्तते ॥

तथा अवरुद्धपुत्रे शोकोपतप्ता बलात्कारेण अभिगच्छन्तम् एकदा लाजा मधुमिश्रा इति विषेण विपर्यस्य भोजयित्वा स्वयमविषान् भक्षयन्ती देवी काशिराजं जघान ॥

तथा सपत्नीभिर्मिथ्याभिशस्ता विपक्ष्योपगृहीता स्पर्शविसर्पिविषोपदिग्धबहिःपार्श्वेन नूपुरेण क्रीडया किलाहत्य कुन्तिभोजं वैरन्त्यं देवी जघान ॥

तथा सौवीरराजं परन्तपनामानम्, अतिवाक्पारुष्योपतापिता तन्मन्युमोक्षार्थिनी देवी स्वयमगदप्रतीकारा विषदिग्धमेखलामणिना प्रणयकोपात् किलाहत्य जघान ॥

तथा जारूथमयोध्याधिपतिं दारान्तरासक्तं बाह्योपचारमात्रोपहता अनन्तरसंभोगपीडिता प्रसाधनकाले विषदिग्धेन आदर्शेन प्रमादात् किल स्खलितेन अभिलिख्य मुखं विषस्पर्शाद् विसर्पोपद्रुतं देवी जघान ॥

तथा विदूरथं वृष्णीनामन्यतमं वेश्याभिः सहोपभुक्ताशेषभार्यान्वयधनम् अक्षममाणा देवी केशवेण्यां गूढमल्पप्रमाणं शस्त्रं कृत्वा निद्रापरवशं मर्मच्छेदाद् जघान ॥

.........नानिच्छन्तीं विमानितां वाभिगच्छेत् । नातिवाक्पारुष्यादिभिरुद्वेजयेत् । नानुपभोगेन पीडयेत् । न वा आसां धनं सपत्नीभिर्भुञ्जीतेति । अत एवोदाहरण.......... ॥

मुण्डजटिलाभिः प्रव्रजिताभिः, परचिन्तापराभिः । कुहकादिभियोगैर्विस्मापयन्तीभिः । (प्रतिसंसर्गम्) अतिसन्धानपरिहारार्थं प्रतिषेधयेत् । न चैना राज्ञीः । कुल्याः कुलजा अपि(तिस्रो!) मातृष्वस्रादयोऽपि बाह्याः पश्येयुः । मा भूदभैषज्यसञ्चार इति । अन्यत्र गर्भव्याधिसंस्थाभ्यः । गर्भिण्यादिषु पश्येयुः तदानीमवस्थाप्राप्तत्वात् ॥

रूपाजीवा वेश्याः । T. 102. ताः स्नानेन प्रघर्षणेन च कषायेण परोपभोगप्रतिषेधार्थम् । शुद्धशरीराः विषोपदेहपरिहारार्थम् । राजकीयभाण्डैः परिवर्तितवस्त्रालंकाराः परिचर्यार्थं स्वैरविहारार्थं वा । राजा पश्येत् ॥

M. 42. आशीतिकाः अशीतिजीवितपरिमाणाः पुरुषाः, पञ्चाशत्का वा स्त्रियः पञ्चाशज्जीवितपरिमाणाः । तेषां नष्टरागत्वात् न बाह्यैः संसर्गः । मातापितृव्यञ्जनाः श्रद्धेया विश्वास्या भवन्ति । स्थविरा वयसा उपधया च शुद्धाः । वर्षवराः षण्डाः । अभ्यागारिकाः अभिमुखेन अगारे नियुक्ताः कञ्चुकिनः । अवरोधानां शौचाशौचं विद्युः अन्तःपुरे सदा सन्निहिताः । स्थापयेयुः स्वामिहिते दृष्टादृष्टार्थगुणदर्शनेन, पतिव्रतासावित्र्यरुन्धती-दमयन्त्याद्युपाख्यानपूर्वकैः ॥

सन्निवेशनियमार्थं श्लोकावाह—सर्वश्च यथास्वं कल्पितायां भूमौ निवसेत् । सर्व इति अवरोधजनः तद्रक्षाधिकृतश्च । तत्र वसन् परभूमौ न सञ्चरेत् । असंचरन्नपि न बाह्येन संसर्गम् । न दानग्रहणादिना कश्चिदाभ्यन्तरो व्रजेत् । मा भूच्चारसञ्चार इति ॥

सर्वं च प्रलब्ध्वपि फलपुष्पादिद्रव्यम् । अवेक्षितं द्वाःस्थैः परिज्ञातमनु-स्मरणार्थं च । निबद्धागमनिर्गमम् । तत्र दौवारिकत्रयं संक्रम्य आभ्यन्तरभूमिमभिगच्छेदिति ॥

इति निशान्तप्रणिधिः सप्तदशं प्रकरणम् ।

विंशश्चाध्यायः ॥

## ॥ अथैकविंशोऽध्यायः ॥

T. 103. पुत्रेभ्यो दारेभ्यश्च रक्षणमुक्त्वा प्रत्यासन्नेभ्यः पौरेभ्यश्च शयनोद्गमात् प्रभृति आत्मरक्षितमुच्यते, आत्मरक्षा प्रयोजनमस्येति । यदाह—शयनादित्यादि । अष्टमरात्रिभागशेषे शयनादुत्थितः स्त्रीगणैरन्येषामभावात् । वन्दिभिः स्तुतिपाठकैः परिगृह्येत परिवार्येत राजप्रकोष्ठ एव । ततो निष्क्रान्तः द्वितीयस्यां कक्ष्यायां कञ्चुकोष्णीषिभिः कञ्चुकोष्णीषप्रच्छादित-शरीरैः वर्षवराभ्यागारिकैः अन्तःपुरपार्श्वमुपचरद्भिः । ततो निर्गतः तृतीयस्यां कुब्जवामनकिरातैः वर्षवराणां बाह्यसंसर्गप्रतिषेधार्थम् । ततो गृहीतालंकार-कुब्जादिसहायो निर्गतः चतुर्थ्यां गौरवान्मन्त्रिभिः मन्त्रभूमेः बहिःस्थितैः । ततः संबन्धिभिः मातुलादिभिः आसन्नत्वात् । ततो दौवारिकैश्च प्रास-

पाणिभिः । परिगृह्येतेति सर्वत्र योज्यम् । दूरघातित्वात् प्रासादीनां क्षेपणायुधानां ग्रहणम् ॥

कक्ष्यान्तरेषु नियतपरिवारे रक्षणमुक्त्वा नक्तन्दिवं रक्षाविधानमाह— पितृपैतामहमिति । पितुरपि यः पैतामह इत्यनुवृत्तिप्रकर्षार्थम् । महता प्रत्यासन्नेन सम्बन्धेन स्रौवयौनमौखेन संबद्धं स्वीकृतम् । तयोरेव विशेषमाह— शिक्षितं ज्ञातप्रहरणविद्याकुशलं कर्मण्यत्वात् । अनुरक्तम् उपकारशीलत्वात् । कृतकर्माणं दर्शितज्ञातकर्म........त्साहकर्म च येनोत । दृष्टसामर्थ्यमित्यर्थः । एवंविधं जनम् आसन्नं कुर्वीत । एवंगुणमपि अन्यदेशागतमकृतार्थमानं न कृतावर्थमानौ यस्य तमासन्नं न कुर्यात् । स्वदेशीयमपि अकृत्योपगृहीतं नासन्नं कुर्यात् । अविस्मृतमहापकारत्वात् । अन्तर्वंशिकसैन्यं कर्तृ राजप्रयुक्तं राजानं गृहगतमन्तःपुरं च सर्वदा रक्षेत् ॥

M. 43. इदानीमाहारेषु प्रतीकारार्थं विशेषेण रक्षणमाह—गुप्त इति । प्रच्छन्ने देशे । माहानसिकः महानसनियुक्तः सर्वं भक्ष्यभोज्यादि कर्म । आस्वादबाहुल्येन पुनः पुनरास्वाद्य वैरस्यपरिहारार्थं कारयेत् । तत् तथा कृतमपि राजा तथैवेति एवमास्वाद्य तत्कारिभिः प्रतिभुञ्जीत । कृतात्मरक्षे प्रतिस्वादयितरि परीक्षाव्यभिचारः स्यादित्याह—पूर्वमिति । आचारानुवर्तनार्थं च अग्नये वयोभ्यश्च वायसादिभ्यो बलिं कृत्वा भुञ्जीतेति ॥

T. 104. तत्र लिङ्गान्याह—अग्नेर्विषयुक्तस्य ज्वाला नीला धूमनीलता शब्दस्फोटनं च अतिमात्रं चटचटाशब्दः । वयसां बलिभुजां विषयुक्तानां विपत्तिः विनाशः ॥

अन्नस्य विषयुक्तस्य अग्नावनवक्षिप्तस्य उष्मा बाष्पं मयूरग्रीवाभः । शैत्यं शीतता शीघ्रम् अतिमर्दनादिच । क्लिष्टस्य वैवर्ण्यं शाल्योदनस्य मलिनता । सोदकत्वम् अक्लिन्नता अस्विन्नत्वम् ॥

कठिनमज्जानां व्यञ्जनानां सूपादीनां विषयुक्तानाम् आशु शुष्कता उचितात् कालादाशु शुष्कत्वम् । दधितक्रादियुक्तस्य विषयुक्तस्य उत्क्वथने क्वाथभावः । प्रदेशस्य अविदग्धस्यापि श्यामभावः । अग्नेश्चिरादवतारितस्यापि

फेनभावः। आम्लसंसृष्टस्येव क्षीरस्य सबन्धावयवविच्छिन्नभावः। गन्धस्पर्शरसादीनां च वधः अभावः॥

विपर्ययावच्छायया वा आत्ममुखबिम्बस्य दर्शनं द्रवस्य वा निष्प्रदर्शनं विध्यमानेष्विव (?)। फेनस्य शृतशीत इव क्षीरे पटलस्य सीमन्तस्य उभयतो विच्छेदस्य ऊर्ध्वराजीदर्शनं च॥

रसस्य मध्ये उपरि नीला राजी पयसः क्षीरस्य ताम्रा। मद्यतोययोः मध्ये काली कृष्णवर्णा। दध्नः श्यामेति........कार्ष्ण्यं श्यामता॥

T. 105. शुष्काणां वल्लूरादीनाम् आशु शातनं शीघ्रमवयवविशरणम्। वैवर्ण्यं च उचितवर्णव्यावृत्तिः॥

कठिनानां भक्ष्यनालिकेरादीनां मृदुत्वम्। मृदूनाम्....विषवायुस्पर्शघ्राणादिभिः क्षुद्रसत्त्वानां मक्षिकादीनाम् अल्पवीर्यत्वाद् वधः मरणम्॥

आहारव्यतिरेकेण अन्यत्रापि परीक्षामाह—आस्तरणप्रावरणानां कार्पासकाविकवल्कचर्मक्रिमिजादीनां मर्दितानामातपशुष्काणां श्याममण्डलता। तान्तवानां तन्तुशातनम्। ऊर्णचर्ममयानां लोमशातनम्। पुष्पपटकम्बलादीनां पक्ष्मशातनम्॥

सौवर्णादीनां मणिमयानां स्फटिकादीनाम्। पङ्कमलोपदेहता पङ्कसदृशेन मलेन उपदिग्धता। स्नेहरागगौरवप्रभाववर्णस्पर्शानां यथोचितं वधः रौक्ष्यविरागलाघवादिना॥

विषयुक्तानाम् आहारादीनां परिहारार्थं लिङ्गान्युक्तानि। विषप्रदस्य तु परिहारार्थं लिङ्गान्याह—शुष्कवक्त्रता श्याववक्त्रता च। वाक्सङ्गोऽपि प्रतिबन्धः। स्वेदो विजृम्भणं चातिमात्रं वेपथुः कम्पनम्। प्रस्खलनं समेऽपि। वाक्यविप्रेक्षणं किं वक्ष्यामीति चायस्य विशेषेण प्रेक्षणं निभालनम्। आवेगोऽङ्गानामवसादः। कर्मणि नियोगे। (स्व)भूमौ च स्वस्थाने च अनवस्थानम् अस्थैर्यम्॥

यत एवमवधार्यते विषं तस्मादस्य राज्ञः परीक्षाप्रतीकारकुशलाः जाङ्गलीविदः जाङ्गलीविद्योपलक्षिता विषतन्त्रविदः। भिषजश्च अष्टाङ्गायुर्वेदविदः आसन्नाः सन्निहिताः स्युः॥

T.106.M.44. यदा राजा स्वस्थः अस्वस्थो वा भेषजमत्तुमिच्छति तदा भेषजव्यापारमाह—भिषगिति। भैषज्यागाराद् राजकीयाद् वैदेहकापणाद् वा आस्वादविशुद्धम् आस्वादेन विशुद्धं भ्रष्टरसवीर्यविपाकत्वात्। औषधं गृहीत्वा पाचकपेषकाभ्यामपि पक्वमपक्वं च ताभ्याम्। आत्मना स्वयं (प्रतिस्वाद्य) परोपजापशुद्ध्यर्थं राज्ञे प्रयच्छेत्। पानं सुरादिपानम्। पानीयम् औषधेन व्याख्यातम्। तत्कर्मान्तविकृतौ स्वकर्मान्तादन्यतो वा आनीय कर्मान्तिकैरात्मना वा प्रतिस्वाद्य प्रयच्छेदित्यर्थः॥

कल्पकः केशानां नापितः। प्रसाधकाः विलेपकादयः। ते स्नातशुद्धवस्त्रहस्ताः अशौचदुरुपदेहप्रतीकारार्थं स्नाता विरजोवस्त्राः प्रक्षालितहस्ताश्च। समुद्रं राजमुद्रिकामुद्रितावरणं क्षुरादि। अन्तर्वंशिकहस्तादिति बहिः कूटमुद्रयापि मुद्रितः स्यादिति अन्तर्वंशे स्थाप्यमिति दर्शयति। परिचरेयुः स्वकर्मणा॥

स्नापकादीनां कर्म बाह्योपजापपरिहारार्थं दास्यः कुर्युः, बाह्यैरसंस्पृष्टा इत्यर्थोक्तम्। तत्र स्नापकः उद्वर्तनाभिषेचनकरः। संवाहकः गात्रमर्दकः। आस्तरकः शय्याकर्मान्तिकः। तासां शिल्पाकौशले ताभिरेवाधिष्ठिताः परीक्षिताः शिल्पिनः स्नापकादयः कर्म कुर्युः। आत्मचक्षुषि निवेश्य पूर्वमश्रुकण्डूयनशूनताद्यभावात् परिशुद्धम्। वस्त्रं माल्यं च तत्कर्मान्तिका दद्युः। तथा स्नानादीनि स्ववक्षोबाहुषु च। चकारात् स्वचक्षुषि निवेश्य तदधिकृता दद्युः। तान्यपि कण्डूश्वयथुविह्वलत्वादि कुर्वन्ति। तत्र स्नानमुद्वर्तनादि। अनुलेपनं चन्दनादि। प्रघर्षणं लोध्रकल्कादि। चूर्णं जम्बूकषायादि। वासः पटवासादि। स्नानीयं रास्नादि। एतेनेति स्वगृहोपकरणपरीक्षणेन। परस्मात् परिग्रहात् सामन्तात्। आगतं व्याख्यातम्॥

T. 107. कुशीलवा नटादयः। शस्त्राग्निरसवर्जम्। शस्त्रादीनि प्रेक्षणीयाङ्गानि त्यक्त्वा अन्यैरुपकरणैर्नर्मयेयुः क्रीडयेयुः। आतोद्यानि चैषां

मुरजपटहादीनि शस्त्रादिसंगोपनहेतुत्वाद् अन्तरुपस्थाने प्रकोष्ठके तिष्ठेयुः । अश्वरथद्विपानां चालंकाराः समायोगा बहिःस्थिता दुष्यन्त इत्यन्तरेव तिष्ठेयुः ॥

मौलपुरुषैरधिष्ठितम् । तेषामाप्तत्वात् । यानं युगादि । वाहनमश्वादिकम् । आरोहेद् राजा । नावं चाप्तनाविकाधिष्ठिताम् आप्तकर्णधारादिनाविकारोह इत्येव । अन्यनौप्रतिबद्धाम् परनौभिः गुणैः प्रतिबद्धां पराधीनगतिम् । वातवेगवशां च अस्वतन्त्रगमनागमनां नोपेयात् नारोहेत् । स्नातुकामस्य उदकान्ते उदकसमीपे गूढपुरुषप्रतिषेधार्थं सैन्यमासीत । मत्स्यग्राहैः कैवर्तैः । विशुद्धमुदकं स्नानार्थं वा अवगाहेत । एवं व्याळग्राहैः सर्पग्राहैः परिशुद्धं गृहीतोत्सारितवास्तव्यागन्तुकसर्पम् । उद्यानं क्रीडार्थं गच्छेत् ॥

तथा लुब्धकैः व्याधैः । श्वगणिभिः आखेटिभिः । अपास्तम् अपनीतं चोरव्याघ्रादिभयं परप्रयोगपुरुषाबाधभयं च यस्मिंस्तन्मृगयारण्यं मृगवनम् । लक्ष्यपरिचयार्थं मृगयार्जितमांसविहितश्राद्धकर्मार्थं च गच्छेत् ॥

M. 45. तथा आप्तैः शस्त्रग्राहिभिः तद्व्यञ्जनातिसन्धानरक्षार्थम् अधिष्ठितः सामन्तदूतं पश्येदित्येव । एवमप्रमादार्थं सन्नद्धः अश्वं हस्तिनं वा यथेष्टगमनाभिद्रवणसमर्थम् । आरूढः नाथनियतदेशसञ्चरणपदातिरेव गम्यत्वात् (?) बलदर्शननीराजनादिषु । सन्नद्धमनीकं गच्छेत् ॥

T. 108. निर्याणेऽभियाने चेति निष्कासप्रवेशकाले च । राजमार्गमुभयतः पार्श्वाभ्यां कृतारक्षं गच्छेत् । तत्रापि दण्डिभिः वेत्रग्राहिभिः । अपास्ता अपसारिताः साहसिकशङ्कया (शस्त्रहस्ताः) प्रव्रजिताः व्यङ्गा विकलावयवाः अप्रमादार्थमशुभदर्शनपरिहारार्थं च यस्मिंस्तत् । एवंविधशस्त्रादिरहितमपि पुरुषान्तरैः संबाधं संकीर्णं राजमार्गमन्यद्वा प्रेक्षणीयादि । नावगाहेत दुर्विभाव्यपुरुषत्वात् । यात्रा देवतायाः । समाजः समवायः । उत्सवो विवाहादिः । प्रहवणं भोजनम् । तानि दशवर्गिकाधिष्ठितानि दशानां दशानं च वर्गो गच्छः ? । तत्र नियुक्तेन......अधिष्ठितानि सत्यामिच्छायां कार्यवशाद् वा गच्छेत् ॥

प्रमादस्थानभूयस्त्वात् प्रतिपदं प्रपञ्चयितुमशक्यत्वात् संक्षिप्य रक्षां श्लोकेनाह—यथा चेति । यथा.......नीत्या अतिसन्धत्ते तथा अन्याबाधेभ्यः अन्यप्रयुक्तेभ्यः आबाधेभ्यः रक्षेदात्मानमात्मवान् ॥

आत्मवत्ता च विनयाधिकारिकार्थानुष्ठानात् । तथा हि—यथोपदिष्टाभिर्विद्याभिः वृद्धसंयोगाज्जितेन्द्रियः अमात्यान् मन्त्रिणः पुरोहितं चोत्पाद्य . . . . (विद्याभिः?)विनियोगार्थं ज्ञातकर्मामात्यशौचः गूढपुरुषानुत्पाद्य यथायथं च प्रणिधाय, तैः स्वविषये कृतकृत्याकृत्यपक्षोपग्रहः कर्तव्यमवधृत्य दूतैर्बाह्यं स्वविहितेऽवस्थाप्य, आन्तरोपद्रवप्रतिषेधाय राजपुत्रान् विनीय, अवरोद्धारं पितरमाराध्य, अवरुद्धं वा पुत्रं वशीकृत्य, अहोरात्रं कार्येष्ववहितः, अन्तःपुरविहारेष्वप्रमत्तः, सर्वाहारविहारस्थानेषु यो रक्षो . . . . मान् स एवात्मवान् इति प्रशंसायां मतुप् ॥

इत्यात्मरक्षितमष्टादशं प्रकरणम् ।

एकविंशोऽध्यायः ॥

समाप्तं चेदं कौटलीयार्थशास्त्रसद्व्याख्यानटीकायां

जयमङ्गलायां विनयाधिकारिकं

प्रथममधिकरणम् ॥

२९२४० 19.9.68

# शुद्धिपत्रम्

| पृष्ठे | पङ्क्त्याम् | शुद्धः पाठः |
|---|---|---|
| ३ | ७ | प्रणम्य सर्वविदम् । |
| ६ | १६ | प्रकरणार्थ- |
| ११ | २५ | 'व्रताद् भोजने' |
| २४ | २८ | अतिसन्दधति |
| २८ | ८ | अवसादयति |
| ,, | १४ | अनुपकुर्वन् |
| ३१ | १४ | -सखिरिति |
| ३६ | २५ | लक्षणविनियोजन- |
| ३९ | ४ | तीर्थश्चेत् |
| ४० | २१ | यत्र |
| ४२ | ५ | दण्ड- |
| ,, | २६ | निवपन्ति |
| ५२ | ८ | परिच्छदाः |
| ५५ | १४ | अदृश्यैः |
| ५६ | १७ | भीत्युद्वेगेन |
| ५९ | २० | प्रात्यन्तिकाः |